ण्डिका कस्कादिषु सर्पिष्कुण्डिका समासे शाब्दोव्यपेक्षाविरहेपि षत्वार्थः व्यपेक्षायां त्वसामर्थ्यम् अतः कृ-
कमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ३।८।४६। अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं स-
कारादेशः स्यात् करोत्यादिषु परेषु अनुत्तरपदस्थस्य अयस्कारः अयस्कामः अयस्कंसः कंसोऽस्त्रीयान भा-
जनम् अयस्कुम्भः अयस्पात्रम् अयःसहिता कुशा अयस्कुशा अयस्कर्णी अतः किम् गीःकारः अनव्य-
यस्य किम् स्वःकामः समासे किम् यशः करोति अनुत्तरपदस्थस्य किम् परमयशःकारः अधःशिरः-
सी पदे ३।८।४७। एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे अधस्पदम् शिरस्पदम् समास इत्येव अधः
पदम् शिरः पदम् अनुत्तरपदस्थस्येत्येव परमशिरःपदम् कस्कादिषु च भास्करः इति विसर्गसन्धिः
स्वौजसमौडिति सुप्प्रत्ययः शिवस अम् इति स्थिते ससजुषो रुः पदान्तस्य सस्य सजुषशब्दस्य च रुः स्यात्
जस्त्वापवादः अतो रोरप्लुतादप्लुते ६।१।११३। अप्लुतादतः परस्य रोः उः स्यादप्लुते अति भोभगो इति प्राप्त ७८

सि॰
कौ॰
१२

६।१।१०२

स्य तस्यापवादः उरण्रपरेति तस्यासिद्धत्वेन तु न भवति तवमन्तु यद्युत्वविधेः सामर्थ्यात् प्रथमयोः पूर्व
सवर्णः अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते नादिचि ६।१।१०४
अवर्णादिचि परे न पूर्वसवर्णदीर्घः आद्गुणः एङः पदान्तादति शिवोऽर्च्यः अत इति तपरः किम्
देवा अत्र अतीति तपरः किम् स्व आगन्ता अप्लुतात् किम् एहि सुस्रोत३ अत्र स्नाहि प्लुतस्यासि
द्धत्वादतः परोऽयम् अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धम् तपरकरणस्य तु तत्सा
मर्थ्यम् दीर्घनिवृत्त्या चरितार्थत्वात् अप्लुत किम् तिष्ठतु पय अ३ग्निदत्त गुरोरनृत इति प्लुतः
हशि च ६।१।११४ अप्लुतादतः परस्य रोरुः स्याद्धशि शिवो वन्द्यः रोरिति सकारान्तस्य ग्रहणे
णान्तेह प्रातरत्र प्रातर्गच्छ देवास् इह इति स्थिते रुत्वम् भोभगोअघोअपूर्वस्य योऽशि एतत्पूर्व
स्य रोर्यादेशः स्यादशि परे असन्धिः सौत्रः लोपः शाकल्यस्य देवा इह देवायिह अशि किम् देवा
सन्ति यद्यपीह यत्वस्यासिद्धत्वात् विसर्गे लब्धे तथापि विसर्गस्यासिद्धत्वेन रुत्वाश्रयत्वं ॥

१२

स्यात् नचयवमल्लिपिः दोदीतिसमुदायहणाश्रयणात् भोसभगोअघोअपूर्वस्य इति सकारान्तानि
पातितानि तेषां शेषत्वेकृते व्योर्लघुप्रयत्नतरः शाकटायनस्य ८।३।१८। पदान्तयोर्वकारयका
रयोर्लघूच्चारणौ वयौ वास्तोऽशि परे यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं भवति
स लघूच्चारणः ओतो गार्ग्यस्य ८।३।२०। ओकारात्परस्य पदान्तस्यालघुप्रयत्नयस्य नित्यं लो
पः स्यात् गार्ग्यग्रहणं पूजार्थम् भो अच्युतः लघुप्रयत्नपक्षे भोयच्युतः पदान्तस्य किम् तो
यम् उञि च पदे ८।३।२१। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपः उञि स उ एकाग्निः पदे किम्
तन्त्वुतम् तन्व उतम् वेञः सम्प्रसारणे रूपम् यदि तु प्रतिपदोक्तो निपात उञ् गृह्यते
तर्ह्युत्तरार्थं पदग्रहणम् हलि सर्वेषाम् ८।३।२२। भोभगोअघोअपूर्वस्य लघ्वलघूच्चारण
स्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन भो देवाः भो लक्ष्मि भो विद्वद्वृन्द भगो नमस्ते अघो
याहि देवा नम्याः देवा यान्ति हलि किम् देवा इह रोऽसुपि ८।२।६९ अह्नो रेफादेशः स्यात् २

नतु सुपि रोरपवादः अहरहः अहर्गणः अहुपि किम् अहोभ्याम् अत्राहन्निति रुत्वम् रूपरा
त्रिरथन्तरेषु रुत्वं वाच्यम् अहोरूपम् गतमहो रात्रिरेषा एकदेशविकृतस्यानन्यत्वात् अहो
रात्रः अहोरथन्तरम् अहरादीनां पत्यादिषु वा रेफः विसर्गापवादः अहर्पतिः अहःपतिः पक्षे
विसर्गोपध्मानीयौ ८।३।१४। रेफस्य रेफे परे लोपः स्यात् ढ्लोपे पूर्वस्य दीर्घोऽणः ढरेफौ लो
पयतीति तथा तस्मिन् वर्णो यौ ढकाररेफात्मके परे पूर्वस्याणो दीर्घः स्यात् पुनारमते हरीरम्यः
शम्भूराजते अणः किम् तृढः वृढः तृह हिंसायाम् वृह उद्यमने पूर्वग्रहणमनुत्तरपदेऽपि पू
र्वमात्रस्य दीर्घार्थम् अजर्घाः लीढः मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्रा
प्ते विप्रतिषेधे परं कार्यम् १।४।२। तुल्यबलविरोधे परं कार्यं स्यात् इति लोपे प्राप्ते पूर्वत्रा
सिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६।१।१३२।
अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे एष विष्णुः स शम्भुः अकोः किम्

[illegible]

सि॰
कौ॰

एवं को रुद्रः अनञ्समासे किम् असः शिवः हलि किम् एषोऽत्र सोऽचि लोपे चेत्पादपूरणम्
६।१।१३४ स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत सेमामविड्ढि प्रभृतिम्
इह स क पादपूरणं लुप्तरमिवामन अविशेषात् श्लोकपादोऽपीत्यन्ये सैष दाशरथी रामः लो
पे चेदिति किम् स इदं तत् स एवमुक्त्वा सत्येवं स यथावरणानुसन्धेदस्ति वड्लग्ने निषद्वैव
शाहश्च स्यग्रणानुद्धृत्याते नेहत सोऽहमाजन्मशुद्धानाम् इति स्वादिसन्धिः ॥ अथ षड्लि अर्थव
द्धातुरप्रत्ययः प्रातिपदिकम् १।२।४५ धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दरूपं
प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः
अर्थवत्सूत्रेण सिद्धे समासग्रहणं नियमार्थम् यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्
हि समासस्यैव तेन वाक्यस्य न प्रत्ययः ३।१।१ आपञ्चमसमाप्तेरधिकारोऽयम् परश्च
३।१।२ अयमपि तथा ङ्याप्प्रातिपदिकात् ४।१।१ ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्यापञ्चमय

[illegible]

2

नच्छेपर । ङ्यावन्ते तग्रहणे तदन्तरहे प्रसिद्धे प्रातिपदिकाधिकारोऽव्यर्थः

रिसमाप्तेरधिकारः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्येव सिद्धे ङ्याप्ग्रहणं ङ्याब
न्तान्तदितोत्पत्तिर्यथा स्यात् ङ्याप्ग्रहणमनर्थकम् इति स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य
स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ४।१।२ ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः

सि
कौ.
४९ स्युः सुङसोरुकारौ वकारौ जशौ टङसौ च इतः विभक्तिश्च १।४।१०४ सुप्तिङौ विभक्तिसंज्ञौ स्तः तत्र स्वौ
जसादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः सुपः त्रीणि त्रीणि
वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने १।४।२२
त्वे स्तः बहुषु बहुवचनम् १।४।२१ बहुत्वे एतत्स्यात् रुत्वविसर्गौ रामः सरूपाणामेक
भक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्वस
वर्णः नादिचि इति इचि रामौ चुटू प्रत्ययाद्यौ चुटू इतौ स्तः इति जस्येत्संज्ञा न विभक्तौ तुस्माः वि
भक्तिस्थास्तवर्गसकारमकाराः इतो न स्युः इति सकारस्य नेत्त्वम् अतो गुणे अपदान्तादकारे ४९

परतः पररूपमेकादेशः स्यात् इति प्राप्ते परत्वात्सवर्णदीर्घः अतो गुणे इति हि पुरस्तादपवादा
नन्तरान्विधीन्बाधन्ते नोत्तरान् इति न्यायेन अकः सवर्णे दीर्घे तस्यैवापवादोयम् न तु प्रथमयोरि
त्यस्यापि रामाः एकवचने संबुद्धिः संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् एङ्ह्रस्वात्सं
बुद्धेः एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते संबुद्धेश्चेत् संबुध्यादि प्राङ्क्स्येङ्ह्रस्वाभ्यां विशेषणाद्रेह हे
कतरत्कुलेति हे राम हे रामौ हे रामाः एङ्ग्रहणं किम् हे हरे हे विष्णो अत्र हि परत्वान्नित्यत्वाच्च सं
बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति अमि पूर्वः अकोम्यचि परतः पूर्वरूपमेकादेशः स्यात् रामम् रामौ
लशक्वतद्धिते तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः इति शसः शस्येत्संज्ञा तस्माच्छसो नः
पुंसि पूर्वसवर्णदीर्घात्परस्य शसः सकारस्य नः स्यात्पुंसि अट्कुप्वाङ्नुम्व्यवायेपि अट्क
वर्गपवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्या
त् समानपदे पदव्यवायेपीति निषेधं बाधितुमाङ्ग्रहणम् नुम्ग्रहणमनुस्वारोपलक्षणार्थम्

इदन्तत्वादुकृदिवस्याकीरम्पंगो भद्रति घादेशेत्यस्येना देशोयेदृदावीनोरितीदीयस्येति लोपे
उनीपिदृयत्नीतिरूपम् न च तत्र परत्वात् स्त्रीशब्दस्येयङा व्याप्तिरूपो दोषो न यस्येति लोपस्याभी
यत्वादसिद्धत्वेनात्र तदप्राप्तेरिति वाच्यम् व्याख्यातेना भीयासिद्धत्वाप्राप्तेः तत्र दि समानाश्र
यत्वमपेक्षितं ...
यतिस्यो ... पेदप्रत्यास ... प्रत्ययान्तरपूर्वतो गेएवे यङ् प्रवृत्त्या स्त्री

सि. नत्र कर्तृत्वमशक्यम् अयोगवाहानामट्पदेशस्याकृतत्वात् इनिराम्निमात्रे पदान्तस्य पदान्तस्य नस्य

को. णत्वं न स्यात् रामान् यस्मात्प्रत्ययविधिस्तदादि प्रत्यये गृह्णम् यः प्रत्ययो यस्मात् क्रियते तदादि श

१५ ब्दरूपं तस्मिन्प्रत्यये परे अङ्गसंज्ञं स्यात् भवामि भविष्यामी इत्यादौ विकरणविशिष्टस्या

ङ्गसंज्ञार्थं तदादिग्रहणम् विधिरिति किम् स्त्री इयती प्रत्यये किम् प्रत्ययविशिष्टस्य ततो व्यधि

करणसमासभूत अङ्गस्येत्यधिकृत्य टाङसिङसामिनात्स्याः अकारान्तादङ्गाट्टादीनां क्रमादिना दय

आदेशाः स्युः णत्वम् रामेण सुपि च यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात् रामाभ्याम् अ

तो भिस ऐस् अकारान्तादङ्गाद्भिस ऐस् स्यात् अनेकाल्त्वात्सर्वादेशः रामैः ङेर्यः अतोऽङ्गात्परस्य

ङे इत्यस्य यादेशः स्यात् रामाय इहस्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपि चेति दीर्घः सन्नि

पातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषात्तु नेह प्रवर्तते कष्टाय क्रमणे इति निर्देश

तस्याप्यनित्यत्वज्ञापनात् बहुवचने झल्येत् झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात्

योयमाप्रे त्योत्पद्यते ह तत्र तिसन्निपातः।।

अत्र शालेन्मा का...
...रणन कर्तव्यः
कारोच्चारणे नैव निर्दि
ता। न चात्र ...
अणाति वररूपा वते। न इ
विधान सा ...
रूपं न स्या ...
सर्वादेश ...
...
प्रतिः तकारैश्चैव निर्वाह
तां ... १५
परत्रैव ...

रामेभ्यः बहुवचने किम् रामः रामस्य ऊलि रामाणाम् सुपि किम् पचध्वम् जश्त्वम् वावसाने
अवसाने च रो वा स्युः रामात् रामाद् द्वित्वे रूपचतुष्टयम् रामाभ्याम् रामेभ्यः रामस्य सस्य द्वि
त्वपक्षे खरि चेति चर्त्वे घ्यान्तरतम्यात्ते सए व न तु तकारः अल्पप्राणतया प्रयत्नभेदात् अत एव सः
सीति निमादेश आरभ्यते ओसि च ओसि च परे अतोङ्गस्य एकारः स्यात् रामयोः ह्रस्वनद्यापो नुट् ह्र
स्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् नामि नामि परे अजन्ताङ्गस्य दीर्घः स्यात्
रामाणाम् सुपि चेति दीर्घो यद्यपि परत्वात्प्राप्तो हृत प्रवृत्ते सन्निपात परिभाषाविरोधात् नामी
त्यनेन नाराम्भ सामर्थ्यादेव परिभाषा बाध्यते रामे रामयोः सुपि रामेषु इति अपदान्तस्य मूर्द्धन्यः
आपादपरिसमाप्तेरधिकारोयम् इण्कोरित्यधिकृत्य आदेशप्रत्यययोः सहेः साढः स इति सूत्रात्स
इति षष्ठ्यन्तपदमनुवर्तते इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्द्धन्या
देशः स्यात् विवृतघोषस्य तादृशस्यैव षकारः रामेषु इण्कोः किम् रामस्य आदेशप्रत्यययोः किम् सु
पिः सुपिसौ सुपिसः अपदान्तस्य किम् हरिस्तत्र एवं कृष्णमुकुन्दादयः सर्वादीनि सर्वनामानि सर्वादी

ननुह्रस्वनद्यापोनुडिति
ह्रास्वेह्रस्वनद्ह र्दां नत
दै वाम् तत्रोच्यते
भावे सूत्रं कि यत्स्माते
स्यादर्घ अग्री पान्हां प
दोत तथाचं नद्यापर
तीय पकृस्वं नुडि तीप
पकृसूत्रम् तत्रार्थः
नद्यंतादा वंता सु
गात्परस्या नीनुडाग
मः स्यात् द्वितीयेप्राति
पदिकपदान्नुवर्त्यप्रा

चादूः दीर्घान्तानां चे नार्हि नद्यापरा वेति न चस्त्री तिपदि कान्नु ट् स्यादित्यर्थः प्रसज्येत रा वं च विश्वपा मित्यत्र नुडापत्तेर्दुरवारत्वं स्यादिति चेन्मे
लिंगानां चे त हि नद्या परा वेति विपरीत नियममा दन्न सर्वादितिदीर्घो लोपादि दीर्घ वलवत्त्वात् न व जगता मित्यादौ दोषः स्यादिति वाच्यम् षट्चतु
दायमन्हस्यास्या वयप कल्पातीति चेन्न गतीनाम् भ्यो तिस त्रे च तु र्दीह्र रासा मेधीत् ऊन्य था युद्र त्ये वव देत् तथा च ह्रस्वनद्नद्रांत्य तुं
मीत्यत्र दीर्घात् अन्यारीत्या ह्रस्वनद्रांत राक्रम तत्रोच्यते विश्वपामित्यत्र सर्वादितिदीर्घो लोपविधीर्वलवानिति परिभाषा मन्नित्यत
नद्यारान्तरूपकत्वात् कोस्तौ नियम इति चेत् ×

टि० रामेश

२३

इत्संज्ञाप्रयुक्तकार्यजनकत्वविशिष्टमित्यनुव
सर्वनामत्वलक्षणम् [illegible] त्वाभावेऽपि इत्यर्थः

सि॰ कौ॰ १९ निशब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः तदन्तस्यापीयं संज्ञा द्वन्द्वे चेति ज्ञापकात् तेन परमसर्वत्रेति त्र
ल परमभवकानित्यत्राकच् सिध्यति जसः शी अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात् अनेकाल
त्वात्सर्वादेशः नचावेन स्थानिवत्त्वादादिवन्नाल्वधकत्वमनेकाल्त्वमिति वाच्यम् सर्वादेशत्वात्प्रा
गित्संज्ञाया एवाभावात् सर्वे सर्वनाम्नः स्मै अदन्तात्सर्वनाम्नो ङेः स्मै स्यात् सर्वस्मै ङसिङ्योः
स्मात्स्मिनौ अतः सर्वनाम्नः एतयोरेतौ स्तः सर्वस्मात् आमि सर्वनाम्नः सुट् अवर्णान्तात्सर्वना
म्नो विहितस्यामः सुडागमः स्यात् एत्वषत्वे सर्वेषाम् सर्वस्मिन् शेषं रामवत् एवं विश्वादयोऽप्य
कारान्ताः सर्वादयश्च पञ्चत्रिंशत् सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम स
म सिम पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञातिधनाख्यायाम्
अन्तरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम्
ति उभशब्दो द्वित्वविशिष्टस्य वाचकः अत एव नित्यं द्विवचनान्तः तस्येह पाठस्तु अकार्थस्तकज
र्थः न चकप्रत्यये नेष्टसिद्धिः द्विवचनपरत्वाभावेनोभयतः उभयत्रेत्यादाविवायच्प्रसङ्गात्

इत्संज्ञाप्रयुक्तकार्यजनकत्वविशिष्टसर्वनामत्वलक्षणम् ... जनकत्वं

ज्ञे

तदुक्तम् उभयोऽन्यत्रेति अन्यत्रेति हि द्विवचनपरत्वाभावे उभयशब्दस्य द्विवचनं नास्तीति कैयटः अस्ती
ति हरदत्तः तस्मात् स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति विकल्पे प्राप्ते
विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वान्नित्यं सर्वनामसंज्ञा भवति उभये इतरइमौ प्रत्ययौ यद्यपि संज्ञाविधौ प्र
त्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापकात् तथापीह तदन्तग्रहणम् केवलयोः
संज्ञायाः प्रयोजनाभावात् अन्यतरान्यतमशब्दाववुत्पन्नौ स्वभावात् द्विबहुविषये निर्धारणे व
र्त्तेते नत्वान्यतमशब्दस्य गणे पाठाभावात् संज्ञा त्वत्व इति द्वावप्यदन्तावन्यपर्यायौ एकउदात्तोप
रोऽनुदात्त इत्येके शाकटायनस्त्वत्परे नेम इत्यर्धे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते य
थासंख्यमनुदेशः समानामिति ज्ञापकात् अन्तरं बहिर्योगेति गणसूत्रे अपुरीति वक्तव्यम् अं
तरवहि:वा. १ अन्तरायां पुरी पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् एतेषां
व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र प्राप्ता सा जसि वा स्यात् पूर्वे पूर्वाः स्वाभिधेया

परा

येक्षावधिनियमोव्यवस्था व्यवस्थायां किम् दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किम्
उत्तराः कुरवः स्वमज्ञातिधनाख्यायाम् १।१।३५ ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञान
सिवा स्यात् स्वे स्वाः आत्मीया इत्यर्थः आत्मान इति वा ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयो धनानि वा अन्त
रं बहिर्योगोपसंव्यानयोः बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञान सिवा स्यात् अन्तरे
अन्तरा वा गृहा बाह्या इत्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः पूर्वादिभ्यो नवभ्यो वा
पभ्योः ङसिङ्योः स्मात्स्मिनौ वा स्तः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं परादीनामपि शेषं सर्ववत्
एकशब्दस्तु संख्यायां नित्यैकवचनान्तः न बहुव्रीहौ १।१।२९ बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा
न स्यात् त्वकम्पिता यस्य त्वत्कपितृकः अहकम्पिता यस्य मत्कपितृकः इह समासात् प्रागेव प्रक्रियावा
क्ये सर्वनामसंज्ञा निषिध्यते अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत स च समासेऽपि श्रू
श्री येत अतिक्रान्तो भवकन्तम् अतिभवकानितिवत् भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रू २८

वद्वारार्थनामकरणं संज्ञेत्युक्ते द्विरा: सपत्नीभवद्दिशास्पं इतिरघौ द्वादिशास्पाइति
पनस्यात् आधुनिकसंकेतो द्विसन्ज्ञेति लक्षणं उक्तमेव स्वार्थमुत्सृज्य पराधीवलं वनत्वं गोत्व
तम् १

पेदृशावर्तिकैनैवतन्निषेधप्रसङ्गाच्चयोगेयथानर्थकमुनीनांप्रामाण्यमसज्जोपसर्जनीभूतास्तुनसर्वादयः महा
न सन्ज्ञाकरणेनतदनुगुणानामेवगणेसन्निवेशात् अतः सन्ज्ञाकार्यमन्तर्गणकार्यंचतेषांनभवति सर्वो
नामकश्चित् तस्मैसर्वायदेहि अतिक्रान्तः सर्वमतिसर्वस्तस्मैअतिसर्वाय अतिकतरं कुलम् अतितत
तृतीयासमासे १।१।२७ अत्रसर्वनामतानस्यात् मासपूर्वाय तृतीयासमासार्थवाक्येपिन मासेनपू
र्वाय द्वन्द्वेच १।१।३१ द्वन्द्वेउक्तासन्ज्ञानवर्णाश्रमेतराणाम् समुदायस्यायंनिषेधोनत्ववयवस्य न
प्र चैवंतदन्तविधिनास्तुट्स्मैः सर्वनाम्नोविहितस्याम: सुडितिव्याख्यानात् विभाषाजसि १।१।३२
जसाधारं यत्कार्यंशीभावाख्यंतत्रकर्तव्येद्वन्द्वेउक्तासन्ज्ञावास्यात् वर्णाश्रमेतरे वर्णाश्रमेतराः शीभा
७।१।१७
वं प्रत्येवविभाषेत्युक्तम् अतोनाकच् किन्तुकप्रत्ययएव वर्णाश्रमेतरका प्रथमचरमतयाल्पार्द्धक
तिपयनेमाश्च एतेजसः कार्यंप्रतिसन्ज्ञावास्युः प्रथमे प्रथमाः इत्यादि शेषंरामवत् तयप्रत्ययः
तत्सत्वंतताग्रास्याः द्वितये द्वितयाः नेमे नेमाः शेषंसर्ववत् विभाषाप्रकरणेतीयस्यङिःसूपसंख्या

24

सि॰
कौ॰

नम् द्वितीयस्मै द्वितीयाय अर्थवद्ग्रहणान्नेह पटुजातीयाय निर्जरः जराया जरसन्यतरस्याम् ७।२।१०१
जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ पदाङ्गाधिकारे तस्य तदन्तस्य च अनेकाल्त्वात्सर्वादेशप्रा
प्ते निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरस् निर्जरसौ निर्जरसः इत्या र
दीन् वाधित्वा परत्वाज्जरस् निर्जरसा निर्जरसे निर्जरसः पक्षे हलादौ च रामवत् वृत्तिकारास्तु पूर्वविप्र
तिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसादिति रू
पम् ततो निर्जरसा निर्जरस इति केचित्तु कम् तथा भिसि निर्जरसैरिति रूपान्तरमुक्तं तदनुसारिभि
षष्ठ्येकवचने निर्जरस्येत्यपि रूपमिति स्वीकृतं एतच्च भाष्यविरुद्धम् पद्दन्नोमास्हृन्निशसन्यूषन्दो
षन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु पाददन्तनासिकामासहृदयनिशाअसृक्यूषदोषयकृ
च्छकृदुदकआसनएषां पदादय आदेशाः स्युः शसादौ वा यत्तु आसनशब्दस्य आसन्नादेश इति का
शिकायामुक्तम् तत्प्रामादिकम् पादः पादौ पादाः पादम् पादौ पादान् पदः पादेन पद्भ्याम् इत्यादि सुडनपुंस १८

२

हि

कस्य १।१।४३। सुडिति प्रत्याहारः स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य स्वादिष्वस
र्वनामस्थाने १।४।१७ कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् यचि भम् १।४।१८
यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् आकडारादेका संज्ञा १।४।१ इत ऊर्ध्वं क
डाराख्यसूत्रात् प्रागेकस्यैकैव संज्ञा ज्ञेया या पराऽनवकाशा च तेन शसादावचि भसंज्ञैव न पदत्वम्
अतो न जस्त्वम् दतः दता जस्त्वम् दद्भ्यामित्यादि मासः मासा माभ्यामित्यत्र रुत्वे यत्वे च यलोपः माभ्याम् मा
भिरित्यादि भस्य अधिकारोयम् अल्लोपोनः अङ्गावयवोऽसर्वनामस्थाना यजादिस्वादिपरो योऽन् तस्याकार
लोपः स्यात् रषाभ्यां नो णः समानपदे एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् पूष्णः पू
ष्णा पूर्वस्मादपि विधौ स्थानिवद्भावस्तेन अउत्व वा येपि इत्येवात्र णत्वं पूर्वत्रासिद्धीयेन स्थानिवदिति नि
हनास्तिनस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात् नलोपः प्रातिपदिकान्तस्य नेति प्रातिप
दिकेति च लुप्तषष्ठीके पदे प्रातिपदिकसंज्ञं यत्पदं तस्य नकारस्य लोपः स्यात् नलोपस्यासिद्धत्वाद्दीर्घ

२१

सि॰ नमेनमे॰ ... न पथिभ्याम् पथिभिः पथिभ्य इत्यादि विभाषाङिश्योः अङ्गावयवोऽसर्वनामस्थानाजादिस्वादिप
१५ रोयोऽन् तस्याकारस्यलोपोवास्यात् ङिश्योः परतः पथि पथिनि पदेशमवत पदन्निति तिसृत्वे प्रभृति ग्रहण
म्प्रकारार्थम् तथाच ङौ ङः प्रयोगमपिदोषवत्वाद्दोषोभाष्येककुदोषणीभृत्सदाहृतःतेनपदंद्धिःप्रयोगोस्त्रियांस्या
न्नेहन्मानसेमनः इत्यादिसङ्गच्छते आसन्नंप्राणमन्वैच्छतिच आसेभवः आसमः दोषशब्दस्यनपुंसकत्वम
प्यतएवभाष्यात् तेनदक्षिणंदोर्निशाचरइत्यादिसङ्गच्छते भुजबाहू प्रवेष्टोदोरितिसाहचर्यात्पुंस्त्वमपिदो
षन्तस्यतथाविधस्यभजतइतिह्ययोर्भवोह्यन्हः संख्याविसायपूर्वस्यान्हस्याहन्नन्यतरस्यांङौ संख्याविसाय
पूर्वस्याहनादेशोवास्यात्ङौ द्व्यन्हि द्व्यहनि द्व्यन्हे विगतमहोव्यन्हः व्यन्हि व्यहनि व्यन्हे अन्हः सायःसायान्हि सायाह्नः
सायाहनि सायान्हे इमदन्ताः विश्वपाः दीर्घाज्जसिच दीर्घाज्जसिइचिचपरेपूर्वसवर्णदीर्घोनस्यात्
वदिविश्वपोःसवर्णदीर्घः विश्वपाः यद्यपीहङौङिनादिचीत्येवसिद्धंजसिनसम्पिपूर्वसवर्णदीर्घदतिनो
क्तिनथापिगौर्य्यौगौर्य्यःइत्याद्यर्थेसूत्रमिहमाधवत्वाद्युपन्यस्तम् आतोधातोः आकारान्तोयोधातुस्तदन्त १५

व

स्यमस्याङ्गस्य लोपः स्यात् अल्लोन्तस्य विश्वपः विश्वपा विश्वपाभ्यामित्यादि एवं शङ्खध्मादयः धातोः किम्
हाहान् हाहासवर्णदीर्घः हाहाङेवृद्धिः हाहै ङसिङसोर्दीर्घः हाहाः ङोसि वृद्धिः हाहौः ङौ आद्गुणः हाहे
शेषं विश्वपावत् आतो धातोरिति योगविभागाद्धातोरप्याल्लोपः क्वचित् क्लोः स्त्रः श्मात् क्लाः हरिः प्रथमयोः ६८
पूर्वसवर्णः हरी जसि च ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे हरयः ह्रस्वस्य गुणः ह्रस्वस्य गुणः स्यात् क्लांस्त्रः आस्येत्वमित्या
सम्बुद्धौ एङ्ह्रस्वादिति संबुद्धिलोपः हे हरे हे हरे विसो हरिम् हरीन् ।।२१४।। शेषो घ्यसखि नदी सञ्ज्ञो ह्रस्वो दिप्रयोगस्य मत्रो दाह्रः लम्
यौ याविवर्णोवर्णौ वर्णौ नदीसञ्ज्ञे सखिवर्जं घिसञ्ज्ञं स्यात् शेषः किम् मन्मे एकसञ्ज्ञाधिकारात्कारात्सिद्धेः ऋ
शेषग्रहणं स्पष्टार्थम् ह्रस्वौ किम् वातप्रम्ये सखि किम् माते आङोनास्त्रियाम् घेः परस्याङो नास्त्रिया २
म् आङिति टासञ्ज्ञा प्राचाम् हरिणा अस्त्रियां किम् मत्या घेर्ङिति घिसञ्ज्ञस्य ङिति गुणः स्यात् हर
ये घेः किम् सख्ये ङिति किम् हरिभ्याम् सुपि किम् पट्वी घेर्ङितीति गुणो हरेः ङसिङसोश्च एङो ङसि
ङसोरति परे पूर्वरूपमेकादेशः स्यात् हरेः हर्योः हरीणाम् अच्च घेः इदुद्भ्यामुत्तरस्य ङेरौत्स्यात् घेरन्तादे

अनङ् सौ।। साविति प्रथमैकवचनमसंबुद्धाविति पर्युदासात्।।
नकारस्तूच्चारणार्थः इत्संज्ञकः ।। १ ।।

सि॰ २॰

शास्त्रकारः हरौ हर्योः हरिषु एवंपत्यग्निरविकव्यादयः अनङ्सौ सख्युरंगस्यानङादेशः स्यादसंबुद्धौसौपरे
ङिच्चेत्यन्तादेशः अलोन्त्यात्पूर्वउपधा १।१।६५ अन्त्यादलः पूर्वो वर्णउपधासंज्ञः स्यात् सर्वनामस्थाने
चासंबुद्धौ नान्तस्योपधाया दीर्घः स्यादसंबुद्धौसर्वनामस्थानेपरे अपृक्तएकाल्प्रत्ययः एकाल्प्रत्ययः एका
ल्प्रत्ययोयः सोऽपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल् हलन्तात्परंदीर्घौयौङ्यापौतदन्ता
च्चपरंसुतिसीत्येतदपृक्तंहल्लुप्यतेसखा हल्ङ्याब्भ्यः किम् ग्रामणीः दीर्घात्किम् निष्कौशाम्बिः अति
खट्वः सुतिसीतिकिम् भैत्तासेल्लकारस्यलोपोमाभूत् नचैवमपिअभैत्सीत्इत्यादौसिचोलोपापत्तिः तिपा
सहचरितस्यग्रहणात्सिचोग्रहणंनास्ति अपृक्तस्यकिम् बिभर्ति हल्किम् बिभेद प्रथमहल्ग्रहणं कि
किम् राजा नलोपोनस्यात् संयोगान्तलोपस्यासिद्धत्वात् हेसखे सख्युरसंबुद्धौ सख्युरङ्गात्परं संबुद्धि
वर्ज्जंसर्वनामस्थानंणिद्वत्स्यात् अचोञ्णिति ञितिणितिप्रत्ययपरेअजन्ताङ्गस्यवृद्धिः स्यात् सखायौ
सखायः सखायम् सखायौ सखीन् घिसंज्ञाभावान्नतत्कार्यम् सख्या सख्ये ख्यत्यात्परस्य खितिश २॰

ह्याभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरस्य उः स्यात् सख्युः । औत् इदुद्भ्यामुत्तरस्य ङेरौत्स्या
त् ङकानन्तृनिरूढनार्थो सख्यौ शेषं हरिवत् शोभनः सखा सुसखा सुसखायौ सुसखायः अनङ्
णिद्वद्भावयोरङ्गत्वानन्तानपि प्रवृत्तिः समुदायस्य सखिरूपत्वाभावेनासखीतिनिषेधाप्रवृत्तेर्घिसञ्ज्ञा सु
सखिना सुसखये ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावान्नाख्यत्यादिसूत्रेण सुसखेः सुसखौ इत्या
परम दि एवमतिशायितः सखा अतिसखः सखीं सखायमिच्छतीति विग्रहे परमसखा परमसखायौ परमसखा
यः इत्यादि गोणत्वे यनङ्णित्वे प्रवर्तेते सखीमतिक्रान्तमतिसखिः लिङ्गविशिष्टपरिभाषाया अनित्य
त्वाच्चटच् हरिवत् इहानङ्णित्वे न भवतः गोस्त्रियोरिति ह्रस्वेन सखिशब्दस्य लाक्षणिकत्वात् लक्ष
णप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् पतिः समास एव १।४।८ पतिशब्दः समास एव घिसञ्ज्ञः
स्यात् पत्ये पत्युः पत्यौ शेषं हरिवत् समासे तु भूपतये कतिशब्दो नित्यं बहुवचनान्तः बहुगणव
तुडतिसंख्या एते संख्यासञ्ज्ञाः स्युः डति च १।१।२५ डत्यन्ताः संख्या षट्सञ्ज्ञा स्यात् प्रत्ययस्य लुक्श्लु

लुक: ७।१।२२ लुकः श्लुलुपशब्दैः कृते प्रत्ययादर्शने क्रमात्तत्तत्संज्ञं स्यात् षड्भ्यो लुक् षड्भ्यः परयोर्जश्
सि. प्रत्यये लोपः प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२ प्रत्ययलोपे पित दाश्रितं कार्यं स्यात् इति जसि चेति
२१ गुणे प्राप्ते न लुमताङ्गस्य १।१।६३ लुकश्लुलुपशब्दैर्लुप्तः लुमता शब्देन लुप्ते तन्निमित्तमङ्गका
र्यं न स्यात् कति कति कतिभिः कतिभ्यः कतीनाम् कतिषु युष्मदस्मदषट्काः त्रिषु सरूपाः त्रिशब्दो
नित्यं बहुवचनान्तः त्रयः त्रीन् त्रिभिः त्रिभ्यः त्रेस्त्रयः त्रिशब्दस्य त्रयादेशः स्यात् आमि त्रयाणाम् परमत्र
याणाम् गौणत्वे नेति केचित् प्रियत्रीणाम् वस्तुतस्तु प्रियत्रयाणाम् त्रिषु द्विशब्दो नित्यं द्विवचनान्तः
त्यदादीनामः ७।२।१०२ एषामकारोऽन्तादेशः स्यात् विभक्तौ द्विपर्यन्तानामेवेष्टिः द्वौ द्वौ द्वाभ्याम् द्वयोः
द्विपर्यन्तानामिति किम् भवान् भवन्तौ भवन्तः संज्ञायामुपसर्जनत्वे च नात्वं सर्वाद्यन्तर्गणकार्यत्वात् द्वि का.
र्नाम कश्चित् द्विः द्वौ द्वयः द्वावतिक्रान्तो तिद्विः हरिवत् संज्ञायामेतत्परमद्वौ औडुलोमिः औडुलोमी उडुलो
माः लोम्नो पत्येषु बहुष्वकारो वक्तव्यः बाह्वादीञोपवादः औडुलोमिम् औडुलोमी उडुलोमान् इनोऽदन्ताः

वातप्रमीरित्युणादिसूत्रेणामाङ्ईप्रत्ययः वातंप्रमिमीतेवातप्रमीः दीर्घाज्जसिच वातप्रम्यौ वातप्रम्यःअ
मिपूर्वः वातप्रमीम् वातप्रमीन् वातप्रम्या वातप्रमीभ्याम् वातप्रमीभिः वातप्रम्ये वातप्रम्यः वातप्रम्यो वा
तप्रम्याम् दीर्घत्वान्नुट् ङौतुसवर्णदीर्घः वातप्रमी वातप्रमीषु एवंपपीयय्यादयः यात्यनेनेतिययीर्मा
र्गम् पातिलोकमितिपपीसूर्यः यापोःकिद्द्वेचेतिईप्रत्ययः क्विबन्तवातप्रमीशब्दस्यतुअमिशसिङौच
विशेषः वातप्रम्यम् वातप्रम्यः वातप्रम्यि एरनेकाचइतिवक्ष्यमाणेनयणा प्रधीवत् बह्व्यःश्रेयस्योयस्यस
बहुश्रेयसी दीर्घङ्यन्तत्वाद्धल्ङ्याबितिसुलोपः यूस्त्र्याख्यौनदी ईदूदन्तौनित्यस्त्रीलिङ्गौनदीसंज्ञौस्तः
प्रथमलिङ्गग्रहणंच पूर्वस्याप्यस्योपसर्जनत्वेपिनदीत्वंवक्तव्यमित्यर्थः अम्बार्थनद्योर्ह्रस्वः अम्बा
र्थानांनद्यन्तानांचह्रस्वःस्यात्संबुद्धौ हेबहुश्रेयसि शसिबहुश्रेयसीन् आण्नद्याः नद्यन्तात्परे
षांङितामाडागमःस्यात् आटश्चआटोचिपरेवृद्धिरेकादेशःस्यात् बहुश्रेयस्यै बहुश्रेयस्याःनद्यन्ता
त्परत्वान्नुट् बहुश्रेयसीनाम् ङेराम्नद्याम्नीभ्यः नद्यन्तादाबन्तान्नीशब्दाच्चङेराम्स्यात् इहपर।

सि·
२२

त्वादाटानुट्वाध्यते वड्श्रेयस्याम् शेषमीप्रत्ययान्त वातप्रमीवत् अश्वत्तत्वात्सुलोपोन अतिल
क्ष्मीः शेषंवड्श्रेयसीवत् कुमारीमिच्छन् कुमारीवाचरन् ब्राह्मणः कुमारी क्यजन्तादाचारक्विवन्ता
द्वाकर्तरि क्विप् हलङ्याविति सुलोपः अचिश्नुधातुभ्रुवांय्वोरियङुवङौ श्नुप्रत्ययान्तस्य इवर्णोवर्णा
न्तधातोर्भ्रू इत्येतस्य चाङ्गस्य इयङुवङौ स्तोजादौ प्रत्यये परे ङिच्चेत्यन्तादेशः आन्तरम्यादेरियङ् श्री
रुवङ् इति इयङि प्राप्ते एरनेकाचोसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो
धातुस्तदन्तस्यानेकाचोङ्गस्य यणस्यादजादौ प्रत्यये परे इति यण् कुमार्यौ कुमार्यः हे कुमारि अमि
शसि च कुमार्यम् कुमार्यौ कुमार्यः कुमार्यै कुमार्याः कुमारीणाम् कुमार्याम् प्रधीः प्रध्यौ प्रध्यः
प्रध्यि उन्नयतीत्युन्नीः धातुना संयोगस्य विशेषणादिह स्यादेव यण् उन्न्यौ उन्न्यः हे उन्नीः उन्न्यं उन्न्यो
ङ्राम् उन्न्याम् एवं ग्रामणीः अनेकाचः किम् नीः निनियः अमिशसि च यरत्वादियङ् नियम् नियः
ङ्राम् नियाम् असंयोगपूर्वस्य किम् सुश्रियो यवक्रियो गतिकारकेतरपूर्वपदस्य यण्नेष्यते अ २२

पौः

दुधियौ परमधियौ कथं तर्हि दुधियः वृश्चिकभियेमस्यने दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्य
धीशब्दं प्रतिगतित्वमेव नास्ति यत्क्रियायुक्ताः प्रादयः स्तंप्रत्येव गत्युपसर्गसंज्ञा वृश्चिकशब्दस्य बु
द्धिकृतमपादानत्वंनेह विवक्षितम् वृश्चिकस्य भियेति वृश्चिकभीः वृश्चिकभीरित्युत्तरपदलोपो वा नमः सुधि
योः एनयोर्यणनस्यात् अविसुपिसुधियौ सुधियः सखायमिच्छतीति सखीयतिततः क्विप् अल्लोपय
लोपौ अल्लोपस्य स्थानिवत्वाद्यणि प्राप्ते पूर्वत्रासिद्धेनस्थानिवत् एकदेशविकृतस्यानन्यतयाऽनङ्णित्वे
सखा सखायौ सखायः हे सखीः अचिपूर्वरूपान्यत्वाद्यणि प्राप्ते ततः परत्वात्सख्युरसम्बुद्धाविति प्रव
र्तते सखायम् शसि यण् सख्यः सह खेन वर्तते सखः तमिच्छतीति सखीः सुखमिच्छतीति सुखीः
सुतमिच्छतीति सुतीः सख्यौ सुख्यौ सुत्यौ ख्यत्यादिति दीर्घस्यापि ग्रहणम् उकारः सख्युः सुख्युः सु
त्युः लूनमिच्छतीति लूनीः क्षाममिच्छतीति क्षामीः प्रस्तीममिच्छतीति प्रस्तीमीः एषां ङसिङसोर्य
ण् नत्वमनयोरसिद्धत्वात्ख्यत्यादित्युत्वम् लून्युः क्षाम्युः प्रस्तीम्युः शुष्कीयतेरिति शुष्कीः पक्कीः इयङ्

लि॰ २३

सुश्रियौ सुश्रियः ङसिङसोः सुश्रियः इत्यादि इतीदन्ताः शंभुर्हरिवत् एवं विष्णुवायुभान्वादयः तृज्व
त्क्रोष्टुः क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्द
प्रयोक्तव्य इत्यर्थः ऋतो ङिसर्वनामस्थानयोः ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् इति प्रा
प्ते ऋदुशनस्पुरुदंसोनेहसां च ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे अप्तृन्तृच्स्वसृन
प्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे
नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् तेनेह पितृभ्रातृप्रभृतीनां न उद्गातृशब्दस्याभवत्येव समर्थ
सूत्रे उद्गातार इति भाष्यप्रयोगात् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् विभाषा तृतीयादि
ष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्टे ऋत उत् ऋदन्ताद् ङसिङसोरति परे
उकार एकादेशः स्यात् रपरत्वम् रात्सस्य रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य रेफस्य विसर्गः
क्रोष्टुः आमि परत्वात्तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् विप्रतिषेधेन क्रोष्टूनाम् क्रोष्ट
क्रोष्टोः

रि क्रोष्टुः एवंहलादौरामवत् ऊदन्ताः हूहूः हूह्वौ हूह्वः हूहूम् हूहूनित्यादि अतिचमूशब्देनदी
कार्यविशेषः हेअतिचमु अतिचम्वै अतिचमूनाम् अतिचम्वाम् खलपूः ओःसुपि धात्ववयवसंयो
गपूर्वोनभवतियउवर्णान्तदन्तोयोधातुस्तदन्तदन्तस्यानेकाचोङ्गस्ययणस्यादजादौसुपि गतिकार
केतरपूर्वपदस्ययणनेष्यते खलप्वौ खलप्वः इत्यादि एवंसुल्वादयः अनेकाचः किम् लूः लुवौ लु
वः धात्ववयवेतिकिम् उल्लूः उल्ल्वौ उल्ल्वः असंयोगपूर्वस्यकिम् कटप्रूः कटप्रुवौ कटप्रुवः गती
त्यादिकिम् परमलुवौ सुपिकिम् लुलुवतुः स्वभूः नभूसुधियोः स्वभुवौ स्वभुवः वर्षाभ्वश्च असंयो
वर्णान्स्ययणस्यात् अपिसुपि वर्षाभ्वौ वर्षाभ्वः दृंभवतीतिदृंभूः अन्हूदृंभूजंबूकफेलूकर्कन्धूदिधिषू
इत्युणादिसूत्रेकुत्वादितः दृंभ्वौ दृंभ्वः दृंभून् दृतिनांतेहिंसार्थकायेभुवः क्विप् दृंभूः दृन्करपुनः पूर्व
स्यभुवोयणवक्तव्यः दृंभ्वौ दृंभ्वः खलपूवत् करभूः करभ्वौ करभ्वः दीर्घपाठकरएवकारः स्वार्थिकः
प्रज्ञाद्यण् कारभ्वौ कारभ्वः पुनर्भूर्यौगिकपुंसि पुनर्भ्वइत्यादि हून्नकारान्तशब्दोस्वयम्भूवत् इत्यु

सि.
२४

दन्ताः धातारौ धातारः हे धातः धातारं धातारौ ऋवर्णान्नस्य णत्वं वाच्यम् धातॄणाम् इत्यादि एवं
नप्त्रादयः पिताङ्ख्यतिपदेन मादिग्रहणस्य नियमार्थत्वान्न दीर्घः पितरौ पितरः पितरम् पितरौ शेषं
धातृवत् एवं यामातृभ्रात्रादयः ना नरौ नरः हे नः नृच नृ इत्यस्य नामि वा दीर्घः स्यात् नॄणाम् नृ
णाम् शेषं पितृवत् इत्यदन्ताः क्रोष्टृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशा
दित्वेरपरत्वम् कीः किरौ किरः तीः तिरौ तिरः इत्यादि गीर्वत् इत्याभावपक्षे तन्नस्ड शनेति अस्तोऽस्तीति चेत
परकरणात् दनड् गुणेन नः क्रुः क्रोकः क्रुं क्रोक्रन क्रक इत्यादीत्कृदंताः गम्लृ शक्लृ अनयोरनुकरणेऽन
ङ् गमा शकाः गुणविषये लपरत्वं गमलौ गमलः गमलं गमलौ गम्लृन् गम्ला गम्ले ङसिङसो स्तस्तस्त उ
दित्वते संयोगान्तलोपः गमुल् शकुल् इत्यादि इति लृदंताः इकामः एहवर्तते सेः सयौ सयः स्मृतेः स्मृत
यौ स्मृतयः इत्येदंताः गोतो णित् गोशब्दात्परं सर्वनामस्थानं णित्कार्यकृत्स्यात् गौः गावौ गावः औतो
म्शसोः आ ओतः इति छेदः ओकारात् अम् शसोः परे आकार एकादेशः स्यात् सशासाहचर्यात् सवेवाम् गर
हणे तेनेह अचिनवं गां गावौ गाः गवे गोः इत्यादि ओतो णिदिति वाच्यं विहितविशेषणं चैतेन सद्योः सद्या

नचात्रहलङ्यादिलोपेनैव लोपोस्तु ॥ प्रत्ययलक्षणन्यायेन संबुद्धौ चेत्यस्यापि प्रवृत्तिः संभवादिति शंक्यं ॥ परत्वात्प्रतिपदोक्तत्वाच्चै
विप्रकृतेहलङ्यादिलोपस्याप्राप्तेः ॥ स्थानिवद्भावादाप्त्वेपि आकाररूपत्वाभावात् आ आवित्याकारप्रश्लिष्य दीर्घग्र
हणस्य प्रत्याख्यानात् ॥ एङ्ह्रस्वादिलोपस्यापि परत्वेनन्याय्यत्वाच्च ॥ इतिभावः ॥ ६ ॥

वौ उकारांतादिहि नेः सर्वनामस्थानमिति व्याख्यानान्नेह हे भानो भानवः उः शंभुः स्वतो येन सः स्व
तोः स्वतावौ स्वतावः स्वतां स्वतावौ स्वतः ॥ इत्योदंताः ॥ रायो हलि ॥ रैशब्दस्याकारोंतादेशः स्याद्धलि
विभक्तौ ॥ आयादेशः ॥ राः रायौ रायः राया राभ्यां राभिः ॥ इत्यैदंताः ॥ ग्लौः ग्लावौ ग्लावः ग्लावं ग्लावौ ग्लावः ॥ औतोम्शसोरादि ७।१।१८
तीह न प्रवर्तते पंडो चक्रुवेणऔ ङेतोः मा वर्णाभावज्ञापनात् ॥ इत्यजंताः पुंलिंगाः ॥ रमा ॥ औङ आ
पः ॥ आवंतादंगात्परस्यौङः शी स्यात् ॥ औङि त्यौकारविभक्तेः संज्ञा ॥ रमे रमाः ॥ संबुद्धौ च ॥ ७।३।१०६ ॥ आप एकारः स्या
त्संबुद्धौ ॥ एङ्ह्रस्वादिति संबुद्धिलोपः ॥ हे रमे २ हे रमाः ॥ रमाम् रमाः ॥ टीबान्तत्वाभावः ॥ आङि चा ७।३।१०५ ॥
पः ॥ आङि ओसि च परे आप एकारः स्यात् ॥ रमया रमाभ्याम् रमाभिः ॥ याडापः ॥ ७।३।११३ ॥ आपः परस्य ङिद्वचनस्य
याडागमः स्यात् ॥ वृद्धिरेचि ॥ रमायै ॥ सवर्णदीर्घः ॥ रमायाः २ रमयोः २ रमाणाम् ॥ ङेराम् ॥ रमायां
७।३।११६ = दीर्घात्परत्वं स्पष्टार्थं
म् १ रमासु २ एवं दुर्गादयः ॥ सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ आवंतात्सर्वनाम्नः परस्य ङितः स्याट् स्यादाप
श्च ह्रस्वः ॥ याटोपवादः ॥ सर्वस्यै सर्वस्याः २ एकादेशस्य पूर्वान्तत्वेन ग्रहणादाबिति सर्वनाम्नः ॥ स्याट्स

प्राचाचार्यैस्तूपन्यस्तं ॥ तदुपेक्षितं ॥ याट स्याटोरकारस्य समुदायानुबंधेन नेह ॥ आटोऽभावात् ॥ ८
आवंतस्य सर्वादिगणपाठाभावात् सर्वनामत्वेनेत्याशंक्याह ॥ एकादेशस्येति ॥ १०

नाविद्यकारादेशस्य पूर्वान्तत्वे नगरहणादतोमिस इत्यैसप्राप्नोति ॥ नचात्र परत्वसामर्थ्यान्नैवमिति वाच्यम् ॥ आकृतनैकादेशे विश्वपामिरित्यादौ कृतार्थत्वादिति चेन्नैव ॥ आलिधावंतादिवच्चेत्यस्याप्रवृत्तेः ॥ ७ ॥

स्वतो हे इतिरमा २ ऊर्ध्वोकारे ६७ ॥ ३ यस्माद्वृत्ता षष्ठ्यन्तः एकारेशस्य पूर्वान्तत्वेन आंति पूर्व अकिति लिकसुभिर्गता इति ॥ काकुरिवाक्षा इतियादिशास्त्रिक इति ॥ विष्टुपरिभाषयापारिभदक त्वात्स्याद्यः ॥ ग्रौ ॥ ४ ॥

पद्धतिवत्तवक्त्र्ये दीर्घोच्चारणसामर्थ्यात् इति परस्य नचतोच्चारणायत्ति पदिः ॥ काकारोच्चारणसाम र्थ्यादिदवच्च व्यात ॥ ७ ॥

त्यक्तुं शक्यमिति॥ न चावन्तस्य द्वितीयादिशब्दस्य तीयप्रत्ययान्तत्वाभावात् विभाषाद्वि गौणत्वादप्राप्तविभाषेयं॥ न तु बहुव्रीहावित्ति निषेधे प्राप्ते॥ इति मामि
तीयेति सूत्रं आवश्यकमिति शंक्यम्॥ राकादेशस्य पूर्वान्तत्वेन ग्रहणात् तत्रावन्तस्यापि तत्वं॥ तस्य लौकिकप्रक्रियावाक्यान्तर्गतसर्वादिविषयत्वात्॥ अ
तीयप्रत्ययान्तत्वात्॥ तीयस्येति पुंवत्कार्यमवश्यं वक्तव्यं॥ नेनैवसिद्धिः॥ विभा स्य च सम. १॥१॥२८॥ सविषयत्वात्॥ १॥
इद्वितीयेति सूत्रेन कर्त व्यमिति भावः॥ ५॥

र्वासाम् सर्वस्याम् सर्वयोः २ सर्वासु एवं विश्वादय आवन्ताः विभाषा दिक्समासे बहुव्रीहौ अत्र सर्व
नामता वा स्यात् उत्तरपूर्वस्यै उत्तरपूर्वायै दिङ्नामान्यन्तराल इति प्रतिपदोक्तस्य दिक्समासस्य
ग्रहणान्नेह योत्तरा सा पूर्वा यस्याः उन्मुग्धायास्तस्यै उत्तरपूर्वायै बहुव्रीहिग्रहणं स्पष्टार्थम् अ ७॥३॥११४
न्तरस्यै शालायै बाह्यायै इत्यर्थः अपुरीत्युक्तेर्नेह अन्तरायै नगर्यै विभाषा द्वितीयातृतीयाभ्याम्
आभ्यां परस्य ङितः स्याट् स्याद् आपश्च ह्रस्वः इदं सूत्रं त्यक्तुं शक्यम् तीयस्य ङित्सु पसंख्यानात् द्वि
तीयस्यै द्वितीयायै द्वितीयस्याः २ द्वितीयस्याम् द्वितीयायाम् शेषं रमावत् एवं तृतीया अम्बा
र्थनद्योर्ह्रस्वः हे अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न हे अम्बाडे हे अम्बाले
हे अम्बिके जराया जरस् जरा जरसौ शीभावात् परत्वाज्जरस् आमि नुट् परत्वाज्जरस् जरसाम् इत्या
दि पदे रमावत् इह पूर्वविप्रतिषेधेन शीभावं सन्निपातपरिभाषया अनित्यतां चाश्रित्य जर
सी इति केचित् तदाहुः स्मान्निर्मूलम् यद्यपि जरसादेशस्य स्थानिवद्भावेनावन्ततामाश्रित्य डोङ् आपः

द्यवकानामेव ह्रस्वः तेन न जगरे
रिवके त्यादौ न दोषः॥ इत्याशये
न फलितमाह॥ अत्राहु केचित्

न्तेषवयोरितानौ इत्यस्मात् षिद्गौरादिभ्योङ् इत्यङि अदृशो ङीति गुणो कृते टाप्॥

स्थानिप्रयुक्तमतिदिश्यते नत्वादेशप्रयुक्तं वारते
इति भाष्यम् ॥ २ ॥

आङि चापः पाङ्आपः ह्रस्वनद्यापः ङेराम् इतिपञ्चापिविधयः प्राप्ताः एवंनसु निशः टन्सु तथाप्यन
लिथाविसर्गके नभवन्ति आआविति प्रश्लिष्य आकाररूपस्यैवापः सर्वत्रग्रहणात् एवं हलङ्याबि
तिसूत्रे आआवीईविति प्रश्लेषादनियहं निष्कौशाम्बिरित्यादि सिद्धेदीर्घग्रहणंप्रत्याख्येयम् नचै
वमप्यतिखट्वायेत्यत्रस्याश्रयमाकारं तस्यानिवद्भावेनाप्संचाश्रित्य याडसादिनिवाच्यं आवन्नेयद
ङ्गं ततः परस्य याड्विधानात् उपसर्जनस्त्रीप्रत्ययेतदादिनियमात् पदन्निति नासिकायाः नसुन
सः नसानोभ्यामित्यादि पदेसुदिचरमावत् निशापानिशः निशः निशा व्रश्चभ्रस्जसृजमृजयज
जराजभ्राजच्छशां षः व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोन्तादेशः स्यात् रुलिपदान्तेच वस्रज
स्तेनडुः निड्भ्याम् निड्भिः सुपिडुः सीतिपुट् चर्त्वम् तस्यासिद्धत्वाच्चयोद्वितीयइति टतयोष्टुत्वेन
नपदान्ताट्टोरितिनिषेधेन निटसु निट्सु षढोः कः सि षसढस्यकः स्यात् सकारे परे इत्येतन्न भव
ति जस्त्वस्यासिद्धत्वात् केचित्तु व्रश्चादिसूत्रे दादेर्धातोरित्यनुवर्तयन्ति तन्मते जस्त्वेन जकारे कु

यत्रादिस्तत्प्रयं तन्नि
मित्तकमित्यर्थः

हसिचैतत्व

स्थानिवद्भावेनेति ॥
नचैवं लक्षणे कृत्वा
क्रियमिहयाट्सादि
तिवाच्यम् अतिदे
शविषये लक्षणप्र
तिपदोक्तपरिभाषा
याप्रवृत्तौ अतिदेश
स्यैवैयर्थ्यापत्तेः ॥
अतो व्याचष्टे आ
वन्तं यदङ्गमिति ॥ य
स्मात्प्रत्ययविधि

स्त्रीप्रत्ययेतदादिनियमोनेत्याशंक्याह
उपसर्जनेनेति ॥ स्त्रीप्रत्यये चानुपसर्जने
नेत्युपसर्जने स्त्रीप्रत्यये तदादिनियमो
प्रतिषेधो वक्तव्यते ॥ नत्तूपसर्जनेपि ॥ अत

स्तदादेस्तदन्तस्य ग्रहणमिति [redacted]
नियमादतिखट्वेतिपदं गं तदावन्तं न
भवति ॥ यद्यावन्तं खट्वा इति तदङ्गमा
वतीति नात्रयाडागमप्रसक्तिरिति भावः
४

ति क्त्व

त्रिभ्याम् त्रिभिः चर्व्वेभ्य स्त्र्यात्वम् त्रिस्तु वोः कुरिति कुत्वं तन्न भवति जस्त्वस्यासिद्धत्वात् मांसपृत

त्रि॰
२९

नासानून्नोमांस्पृत्स्नु वोवाच्यः शसादौ वा पृतः पृतो पृद्भ्याम् २ यद्वेस्तु दिवरमावत् गोपाविश्वपा

वत् मतिः प्रायेण हरिवत् स्त्रीत्वान्नत्वाभावः मतीः नात्वत्वमस्या ङितिह्रस्वश्च इयङुवङ्स्था

इयङुवङ्स्थानौस्त्री पाद्भिन्नौनित्यस्त्रीलिंगौ ईदूतौ ह्रस्वौ च ह्रस्वौ इवर्णोवर्णौ स्त्रियांनदीसंज्ञौ त्रिविशेषणानि इत्यर्थः स्त्रियामित्येवविशेषणं न तु स्त्रीत्वपर्यन्तं अन्यथा ङ॰ प्रपतिप्र भृतीनां सर्वलिंगानां स्त्रीत्वेपि नदीत्वेन स्यात्

नौस्त्री शाद्भिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ ह्रस्वौ च ह्रस्वौ इवर्णोवर्णौ स्त्रियां नदीसंज्ञौ स्तो ङिति परे आ

डागमः मत्यै मतये मत्याः मतेः नदीत्वपक्षे औदिति ङेरौत्वे प्राप्ते इदुद्भ्याम् नदीसंज्ञकाभ्यामिदुद्भ्या

परस्य ङेराम् स्यात् पक्षे अच्च घेः मत्याम् मतौ एवं श्रुतिसृत्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ

स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः अचिर ऋतः तिसृचतसृ एतयोः ऋकारस्य रेफा

देशः स्यात् अचि गुणादीर्घोत्वानामपवादः तिस्रः २ तिसृभिः १ तिसृभ्यः २ आमि नुम् चिरोचित्रुट्

न तिसृचतसृ एतयोर्नामि दीर्घो न स्यात् तिसृणाम् तिसृषु स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह

प्रियास्त्रयः स्त्रीणां वा यस्याः सा प्रियत्रिः मतिवत् आमि प्रियत्रयाणामिति विशेषः प्रियास्तिस्रो

तिस्रलिङ्गे तिसृत्र ऋतोङ्गी तिसृणामिस्वरत्वमपवादः तिस्रः पक्षेपत्रत्रप्रथमयोरितिपूर्वसवर्णस्यापवादः प्रियतिस्रः आगतः प्रियतिस्रः स्वमित्यत्र ऋत उदित्युत्वस्येतिविवेकः ३

आङ्नाद्यस्त्रियामिति नाचनाः
वा

२९

प्रियतिस्रेति ... प्रियाजस्य त्रिजस्इतिस्थिते स्थदुसनेत्मनडुःपद्यपीदजदन्त्वार्थाद्वृति पदे त्रिशाद्गुसनिरर्थकत्वेन स्त्रीवा चित्त्वं दुर्लभं तथापि भद्रतद्वगत्सास्रियां वृत्तिर्वा थ्यौ।

यस्य सः प्रियतिसा प्रियतिस्रौ प्रियतिस्रः इत्यादि प्रियास्तिस्रो यस्य तत् कुले प्रियत्रि स्वमोर्लुके
... लुमतेन प्रत्ययलक्षणाभावान्न तिस्रादेशः नलुमतेति निषेधस्यानित्यत्वात् पक्षे प्रियति
सृ एदेशात् सर्वविप्रतिषेधेन नुम् प्रियतिसृणी प्रियतिसृणि तृतीयादिषु वत् माणगुम्वज्ञावे
विकल्पनात्पर्याये णा नुमर भावो प्रियतिसृा प्रियतिस्रणा इत्यादि द्वे रत्वेसत्वाप् द्वे २ द्वाभ्याम् इद
योः २ गौरी गौर्यौ गौर्यः नदीकार्यं हे गौरि गौर्यै इत्यादि एवं वाणीनद्यादयः प्रातिपदिकग्र
हणे लिङ्गविशिष्टग्रहणादनङ्गणिद्वद्भावे च प्राप्ते विभक्तौ लिङ्गविशिष्टाग्रहणम् सखी सखौ
सख्यः इत्यादि गौरीवत् अङ्ग्यन्तत्वान्न सुलोपः लक्ष्मीः लक्ष्म्यौ गौरीवत् एवं तरीतन्त्र्यादयः उङ्
न्तत्वान्न सुलोपः स्त्री हे स्त्रि स्त्रियाः स्त्री प्राह स्यपइ स्यात् अजादौ प्रत्यये परे स्त्रियौ स्त्रियः वाम्शसोः
अमि शसि च स्त्रिया इयङ् वा स्यात् स्त्रियम् स्त्रीम् स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः स्त्रियोः परत्वा
न्नुट् स्त्रीणाम् स्त्रियाम् स्त्रीषु स्त्रियमतिक्रान्तो तिस्त्रिः अतिस्त्रियौ गुणनाभावो त्वनुट् भिः प

यथलक्षणप्रवृत्तिः नापुनरर्थं नदीतिवाच्यं उत्तरस्यैव कर्तव्यत्वाचीति कारणस्यैवेयर्थ्यात् नलुमतेति निषेधस्यानित्यत्वेन संवृद्धौ प्रत्ययलक्षणेन प्राप्तानन्तु मवारपित्तनदिति २

अमित्यत्वादिति इको चीसन्नुहत्मा [illegible] मिहलिंगं तथा हि प्रिया भिन्नादिसमपित्न मिनलोपः प्रातिप दिकान्तस्येति नलो पसंभवात् दीर्घत्वम् पीनत्वनदिसंबुद्धौ तितिनिषेधात् सर्वं दी लोपो न संभवतीति तस्मान्निष्टवारणाय उचीत्यावश्यकमिति वाच्यं सत्यं दिग्वल्लु कालप्रेपिलुमःप्रा प्रेरेवतत्र दुर्लभत्वा ल्लुमतेति निषेध स्यानित्यत्वाद्विनान्तद्

सौरीति स्त्र्यायते ऽस्यां श्रुत्वा रोगोति तेतिस्त्रीस्त्र्यायतेः इट्लोपो व्योति त्रियः ट्लोपः टिलाङीप तदाह उक्तत्वादिति द्वि पारुतीयउ येने यादेशा विनात्मनेति प्रजायै पउपायै हो दिविति उपसर्जनत्वे पुंसिवि घमानस्य स्त्रीत्वाद स्य उ साविति वेत्व नित्यं ॥ नत्वम उग्रहणनाभावा ति पूर्वेते बाधि तत्वादित्यर्थः उपा पउ वउ स्यात्वे नो वित्यस्येवेति तियस्या दयेवेति ज्ञात्वगुतो नादियउ वउ स्या नावितिर्दिद्धे तेतोर्वे शेबाणाते नेपरउ व

स्यान्न ग्रहणं किं
प्रकृत्याद्यर्थः हे स्त्रि
प्रयत्नस्यैकाच
इतियण् इयङ्
वाध्यन्ते नेयङ्
ङ् स्थानाविति
बौ सि यौनवति
यत्ते यङ् वङ्
नियते धातुः तैः
बहुत्रीस्त्री संज्ञा
ति प्रिधः यत्र
पवादेन वाधेने
ते नतत्रापि धः
इत्येव धस्थान
ज्रहणं कृतं ॥ ३ ॥

रत्वात् सिवाथ्यते क्लीबे तु मा च स्त्री शहस्य स्येयङि त्यव यथार्थतामू जसि च अतिस्त्रियः हे अतिस्त्रे हे अति
स्त्रियौ हे अतिस्त्रयः वाम्शसोः अतिस्त्रियम् अतिस्त्रिम् अतिस्त्रियौ अतिस्त्रियः अतिस्त्रीन् अति॰
स्त्रिया अचघेः अतिस्त्रौ ङेरुसोकारे च नित्यं स्यादम्शसोस्तु विभाषया इयादेशस्तु नान्यत्र अतिस्त्रियाः
पुंस्त्वं यसर्जने अतिस्त्रि क्लीबे तत्वम् अतिस्त्रिणी आङो ना अतिस्त्रिणा अतिस्त्रिणे ङेः प्रभृत्यजादौ
वा पुंवद्भावविकल्पस्तेषां गवत्पम् अतिस्त्रये अतिस्त्रिणः अतिस्त्रेः अतिस्त्रिणोः अति
स्त्रियोरित्यादि स्त्रियान्तु प्रायेण तुम्वद् शसि अतिस्त्रीः अतिस्त्रियाः ङितिहस्वश्चेति ह्रस्वान्तत्वप
क्षे विकल्पः अस्त्रीति तु इयङुवङ्स्थानाविति स्यैव पर्युदासं न्तस्त्वरूदैः स्यावान्नुहत्तेनदीत्वं स्यायां
निषेधो न तु ह्रस्वस्य अतिस्त्रियै अतिस्त्रिये अतिस्त्रियाः अतिस्त्रेः २ अतिस्त्रियाम् अतिस्त्रौ श्रीः
श्रियौ २ श्रियः नेयङुवङ्स्थानावस्त्री इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ नस्तो न तु
स्त्री हे श्रीः श्रियै श्रिये श्रियाः श्रियः वामि ७।१।८।५ इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदी २७

प्रधीप्रभृतिस्यतितिति
का एरनेकाच इति यणात्र
पक्षे वा धात्वेक्षु
वक्ष्यमाणा इति ति
वेधीत्यनेन वर्तते ।।
भ्रमतीति ... भ्रमे
... मिति ... ते
प्रत्यय : ... लो
पः ... इति इ
प्रत्ययस्या ... प्रत्य
यत्वात् ... ऽपि
स्त्रियः ... भवति ।।
नेयङुवङ् स्थाना ...
ति नदी संज्ञा ... वे
धात्संबन्धि ... स्त्वा
ति भावः ।। ...
पयत्वे इति ...
तह्नीति विमान्य ... ता
... इति
इति ।। कालिदास
प्रयोगोपत्र पप
न्नेहति वोध्यम् ।।

नन्यो लोनन्तस्त्री श्रीणाम् श्रियाम् श्रियाम् श्रियि प्रधीशब्दस्यनुवृत्तिकारादीनां मते लक्ष्मीवद्रू
पम् पदान्तरं विनापि स्त्रियां वर्तमानत्वे नित्यस्त्रीत्वमिति स्वीकारात् गौणत्वगानविधायकत्वेनादि
निके पदमतेन तु सुमवद्रूपम् प्रकृत्यर्थातीरितिविग्रहे तु लक्ष्मीवद्रूपम् अभिधाभिचप्रथमं प्रध्यः इ
विशेषः सुधीर्यस्याः सुध्यायनिवाइतिविग्रहे तु वृत्तिकारमते सुधीः श्रीवत् मतान्तरे तु सुमत्
सुधी रितिविग्रहे तु श्रीवद्देव ग्रामणीः पुमवत् ग्रामनयनस्यात्त्रगतः पुंधर्मनयापदान्तरे विना
पि स्त्रियामवर्तेः खलवनादेरपि पुंधर्ममात्त्रसंगिकं बाधाम् येनुमं तिवत्स्त्रियाञ्च स्त्रीवाचिको
ष्टुशब्दस्य जन्तुवद्रूपं लभते अन्येभ्योऽपि ऋन्नेभ्यो नान्तेभ्य स्त्रियां ङीप् स्यात् क्रोष्ट्री क्रोष्ट्रो
क्रोष्टुः वधूर्गौरीवत् सुभ्रूः श्रीवत् सुभ्रूः कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः प्रमाद एवा
यमिति वहूवः खलपूः पुमवत् पुनर्भूः दृन्करेति यणा उवङो बाधनात्तेनेयङुवङ्-ति निषेधोन हे पु
नर्भु पुनर्भ्वं पुनर्भ्वः एकोऽजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थात् निमि
त्तात् परस्य प्रातिपदिकान्तनुविभक्तिस्थस्य नस्य णत्वं नित्यं स्यात् आरम्भसामर्थ्यात् नित्यत्वे सि

बहुवः इति केचित्तु नेयं
... ति ... मीत्यतो वा
... मपवृत्त्यव ...
स्थित ... मावाज्ञापि
तपसमाधायि ... ।। तत
ले ... ।। तथा सती
... वामी
त्पुतरसु ... वर्ण
स्यात् ।। नेयङुवङ्
स्थाने ... वन्हे
शक्यत्वात् ।। ...
सामान्येन ...
मितिकथं चित्समा
धेयः ।। ७ ।। एतत्का
चः ।। एकोच पस्मिन
तत एकाच् ।। तदुत्त
रपदं यस्य स एकाज
त्तरपदं इति वहुव्रीहिः
गर्भो वहुव्रीहिः ।। उत्त
रपदाः समासाव
यवे रूढः ।। ...
तिपूः समासेनेन
विशिष्यते ।। इत्या

स्वयंभुपूर्वदिति मतद्वये पिनद्धि संज्ञायाः प्रभावात् ... दिनप्रवर्ततेइति भावः ॥ १ ॥

...ऽः पुनर्णीयहणांसमष्टार्थम् यणोवाधित्वात्परत्वान्नुट् पुनर्भूणाम् वर्षाभूः भेकजातौ नित्यस्त्रीत्वा
भावात् हेवर्षाभूः केवलमते मतान्तरेतु हेवर्षाभु भेकोपुनर्नवायांस्त्रीवर्षाभू दहे्रेपुमानिति
यादवः वर्षाभ्वश्च वर्षाभ्वौ वर्षाभ्वः स्वयम्भूप्रभृत नषट्स्वस्त्रादिभ्यः षट्सञ्ज्ञकेभ्यः स्वस्रा
दिभ्यश्चङीप्टापौनस्तः स्वसातिस्रश्चतस्रश्चननान्दादुहितानयायातामातेतिस्प्तैताः स्वस्रा
दयउदाहृताः अप्तृन्नितिदीर्घः स्वसा स्वसारौ मातापितृवत् पुंसिमातृः स्त्रीगोवत् वृः पुन
तु नौग्लौवत् इमजन्ताः सीलिङ्गाः अथ नोम् अनोज्ञाते क्लीवान्यरयोः स्वमोरमादेशः स्यात् अ
मिपूर्वः ज्ञानम् एङ्ह्रस्वादिति हलमात्रलोपः हे ज्ञान नपुंसकाच्च क्लीवात्परस्यौङः शी
स्यात् भसञ्ज्ञायाम् यस्येतिच भस्यवर्णावर्णयोर्लोपः स्यादीकारेतद्धितेचपरे इत्यकार
लोपेप्राप्ते औङः श्यां प्रतिषेधोवाच्यः ज्ञाने जश्शसोः शिः क्लीवादनयोः शिः स्यात् शिसर्वना
मस्थानम् ७।१।१५८। शिइत्येतदुक्तं सर्वनामस्थानसञ्ज्ञं स्यात् नपुंसकस्यझलचः झल
न्तस्याजन्तस्यक्लीवस्यनुमागमः स्यात् सर्वनामस्थानेपरे उपधायादीर्घः ज्ञानानि पुनस्तद्वत्

...इत्यभिप्रायेणेदं व्याख्यातम् ॥ ६ ॥

हलमात्रेति ॥ हे ज्ञान ह इति स्थिते ॥ ... लोपात्परत्वाद मादेशे कृते अमिपूर्व
इति ज्ञानमिति ॥ ... कीति ॥ ... ज्ञानमिति ... ॥ ... परत्वादमि ...

तेचतस्रात ... भवतीति ॥ ततः परत्वात् वृद्धिनेमकारस्यलो
परूपार्थः ॥ १

नषट्स्वस्रादिभ्यः स्त्रीपांव यत्रुटिति नभवतीतिव्याख्या नात्पदन्तरेऽपि ... वदितिष्टच पितेविष्यतइत्या शयेनाह ... पौनेति स्वस्रादीनां ... षट्सञ्ज्ञकानां ... ॥

शेषंरामवत् एवंवनयनादयः अड्डतरादिभ्यः पञ्चभ्यः एभ्यः क्लीवेभ्यः स्वमोरदड्डादेशः स्यात् देःडि
तिपरे भस्यटेर्लोपः स्यात् वावसाने कतरत् कतरद् कतरे कतराणि पुनस्तद्वत् भस्येति किम् प
ञ्चमः टेर्लंघ्रवात्तयोरिति पूर्वसवर्णदीर्घः एङ्ह्रस्वादिति सम्बुद्धिलोपश्च न भवति हे कतरत् शु
नस्तद्वत् कतमत् कतमद् कतमे कतमानि अन्यत् अन्यद् अन्ये अन्यानि इतरत् इतरद् अन्य
तरत् शेषं सर्ववत् अन्यतमे शब्दस्तु अन्यतममित्येव एकतरात्प्रतिषेधो वक्तव्यः एकतरम्
सोरमादेशे सन्निपातपरिभाषया न जरस् अजरम् अजरसी अजरे परत्वाज्जसि कृते फलन्तत्वा
न्नुम् सान्तमहतः संयोगस्य सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्याद सम्बुद्धौ
सर्वनामस्थाने परे अजरांसि अजराणि अमिल्लुकोपवादममभावं बाधित्वा परत्वाज्जरस् ततः
सन्निपातपरिभाषया न लुक् अजरसम् अजरम् अजरसी अजरे अजरांसि अजराणि शेषं
पुंवत् पदन्निर्हृदयोदकास्यानो हृद् उदन् आसन् इत्यादि हृदा हृद्भ्यामित्यादि उदानि उद्ना उद

एतेन स्वमोरमादेशे
कृते चाजरमिति
प्राचो ग्रंथः प्रत्यु
क्तः ॥६॥

अतिसखीनीत्यत्र सख्युरसंबुद्धाविति णिद्वद्भावाद्वृद्धिः प्राप्ता॥ वारिणीत्यत्र त्वचेघेरित्यौत्वे प्राप्ते। इकोऽचीत्यादौ तृज्वद्भावः प्राप्तगान
नुमन्नुटोः किं विरोधः न त्वाद्दृ॥ नामीति दीर्घत्वमिति॥ नुमचिरेत्यादि भत्वात्तस्मिन्नति दीर्घनस्यादिति भावः॥ ४॥

भ्यामित्यादि आसानि आस्ना आसभ्यामित्यादि मांसानि मान्भ्यामित्यादि वल्लनत्तु प्रभृतिग्रहणं
प्रकारार्थमित्युक्तम् अतएव भाष्ये मांसपृच्चन्याऊखाया इत्युदाहृतम् अयस्मयादित्वेन भत्वात्संयो
गान्तलोपो न यद्यपि पदन्नित्यत्र छन्दसीत्यनुवर्तितं हतौ तथाप्ययोभिरित्यत्र मासः छन्दसीति
वार्तिके छन्दोग्रहणं सामर्थ्याल्लोकेपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्र
योक्तव्या इति बोध्यम् ह्रस्वो नपुंसके प्रातिपदिकस्य क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्
श्रीपं ज्ञानवत् श्रीपाय अत्र सन्निपातपरिभाषया औतो धातोरित्यालोपो न। स्वमोर्नपुंसका
त् क्लीबादद्गौ न्स्वमोर्लुक् स्यात् वारि इकोचि विभक्तौ इगन्तस्य क्लीबस्य नुमागमः स्यात् अचि
विभक्तौ वारिणी वारीणि हलादौ हरिवत् न लुमते निमित्तस्यानित्यत्वान्मसंबुद्धिनिमित्तो
गुणः हेवारे हेवारि आङो नाऽस्त्रियां घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्पूर्व
विप्रतिषेधेन वारिणा वारिणे वारिणः वारिणोः नुमचिरेति नुट् नामीति दीर्घत्वम् वारीणाम् वारिणि

श्रीपाणीत्यादावेकाजुत्तरपदे णत्वमपीति विशेषः। श्रीपेणिपा ... नादेशेन सहाद्गुणे कृते एकादेशस्य पूर्वान्तत्वेन ग्रहणा २९
ति भावः॥ २॥ दचः परस्मिन्निति सूत्रे पूर्वस्मादपि विधिरिति पंचमीसमासपक्षाश्रयेण ह्वास्याविवादाद्वा एकाजुत्तरपदत्वमस्तीति स्यादेव
णत्वं॥ ६॥

५५

तृतीयादिष्विति॥ यर्यन्त भाषितः पुमान् येन शब्देन स भाषित पुंस्कः शब्द इति विज्ञायेत॥ तदा पीलुने त्यादावति प्रसंगः
स्यादतो व्याचष्टे प्रवृत्तिनिमित्तैक्य इति॥ अयंभावः॥ भाषितः पुमान् यस्मिन्नर्थे तद्भाषितपुंस्कं॥ यच्छब्दरूपं कस्य
तेऽइति॥ प्रवृत्तिनिमित्तभेदादिति॥ पीलुशब्दस्य हि तत्त्वव्याप्यजातिर्वृक्षे प्रवृत्तिनिमित्तं॥ फले तु फल त्वव्याप्यजा

हलादेरिव तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्क
मिगंतं क्लीबं पुंवद्वास्यात् टादावचि अनादये अनादिने ऽस्यादिशेषं वारिवत् पीलुर्वृक्ष
स्तत्फले पीलुनस्मै पीलुने अत्र न पुंवत् प्रवृत्तिनिमित्तभेदात् अस्थिदधिसक्थ्यक्ष्णामन
ङुदात्तः एषामनङ् स्याट्टादावचि स चोदात्तः अल्लोपोनः दध्ना दध्ने दध्नः दध्नोः दधनि द
ध्नि शेषं वारिवत् एवमस्थिसक्थ्यक्षि तदन्तस्याप्यनङ् अतिदध्ना सुधि सुधिनी सुधीनि
हे सुधे हे सुधि सुधिया सुधिना प्रध्या प्रधिना मधु मधुनी मधूनि हे मधो हे मधु एवं
संवादयः सानुशब्दस्य स्नुर्वा स्नूनि सानूनि स्नु स्नुनी स्नूनि स्नुना सानुना प्रि
यक्रोष्टु प्रियक्रोष्टुनी तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् प्रियक्रोष्टूनि टादौ पुंवत्वे प्रि
यक्रोष्ट्रा प्रियक्रोष्टुना प्रियक्रोष्ट्रे प्रियक्रोष्टवे अन्यत्र तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम्
प्रियक्रोष्टुने नुमचिरेति नुट् प्रियक्रोष्टूनाम् थात् थातृणी थातॄणि हे थातः हे थातृ थात्रा

स मेव तद्यथा भाषितपुंस्कत्वा[redacted]भावान्मधुने मधुनः मधुनोरित्येव भवति न तु मधवे मधो॥ रैतपादिरिति कृ॥ स्नुर्वेति॥ मांसपृत नासानु
नामिति वार्तिककारोक्त्येति भावः॥ स्नुः प्रस्थः सानुरस्त्रियामित्युभयलिंगः सानुशब्दः॥ तुल्यपुंस्कत्वे रूपमाह स्नूनि सानूनीति॥ पुंसि तु स्नून्सानूनित्या
दिः॥ स्नुर्वेति॥ शोभन लवणकार्त्स्न्ये पुनपुंसकयोरेकमेवेति भाषितपुंस्कत्वात् पुवत्वे तदोषाभावाः सपीति यणः॥ सलनेति॥ यणो वाधीत्वोपर
त्वीन्नुम॥ धात्रेति॥ धारणपोषणकर्तृत्वपुंनपुंसकमेवेति पुंवत्त्वे यण्॥ ५

किंतु मध्याचवत्
तोत्वादिविरूपं॥ प्रि

प्रवृत्ति निमित्तभेदात् ... वृषभ उभयथापि पुं नपुंसकयोः नैकं प्रवृत्ति निमित्तभावः

यौरेकु

लीयरतः पदांते वाविघमान

त्यद्व स्वेत्यर्थः ॥६॥ लि

दास्वितेऽत्र रेफेन उः तस्य

रव विवेति चत्वेन टः तस्या

सिद्धत्वाच्चेयो द्वितीयाइ

तिटस्यठो न भवति नय

दांता द्वेषि ति निषेधा

सि:

प्रि

इ:

लिट्ल्वीति ढस्य जश्त्वे

न डुकारस्य कृते चर्त्वम्

सिद्धत्वान्नतः प्रगेव

डः सीति पदे घुट्च

त्वेन तकारः ॥ ततो

डुस्य चर्त्वेन टः ॥

धुट् फत्वस्यासिद्ध

त्वात् पदेत्वयोः द्विती

या इतितस्यष्टोन ष्टुत्वं ढ नकारस्य न णत्वमेव ॥ नपदांताद्विति निषेधस्याच्छनैवोत्नवात् ॥७॥ उपदेशग्रहणस्याख्या ॥ धृतिथापि पविदान्तः फल

मित्याह ॥ अधोगित्यादिना अमा भ्रदित्वं तेनेति ८ ॥

प्रघ्नेति ॥ प्रकृष्टस्वर्गवत्वादिकं चयत्प्रवृत्तिनिमित्तं पुंनपुंसकयोः समानमिति भाषितपुंस्कत्वात् पदेत्पुंवद्भावो व स्यादे

वेत्याशंक्याह ॥ यदिगंतमिति ॥ प्ररीति ॥ प्रकृष्टो रायस्येतत्प्ररि ॥ शोभनं नौयस्य तत्सुनु ॥ पं ॥ २ ॥ राम ॥

धारणा एवं शास्त्रकर्तोदयः एकद्रुग्नुसादेशो ५।४।१९ अदिश्यमाने बुद्धस्येष्ठम येषु च ङेङो वस्मात् ॥प्रद्यु॥

प्रद्युनी प्रद्यूनि प्रद्युना इत्यादि इहनपुंस्वत् यदिगन्तप्रद्युइतितस्य भाषितपुंस्कत्वाभावात् एव

मग्रेपि प्ररिणी प्ररीणि प्ररिणा एकदेशविकृतस्यानन्यत्वाद्रायो हलीत्यात्वम् प्रराभ्याम् प्रश

भिः नुम् चिरेति नुडानेवप्रस्वणामिति माधवः वस्तुतस्तु सन्निपातपरिभाषयानुडाते नन्नामीति

दीर्घस्तु आरम्भसामर्थ्यादेव परिभाषाबाधनइत्युक्तम् प्ररीणाम् सुनु सुनूनि सुनुनेत्यादि ॥ सुनुनी

इत्यजन्तानपुंसकलिङ्गा ॥ होढः हस्य ढः स्यात् झलि पदान्ते च हलङ्याब्भ्यइति सुलोपः पदा

न्तत्वाद्धस्य ढः जश्त्व चर्त्वे लिट् लिड् लिहौ लिहः लिहा लिड्भ्याम् ...... लिट्सु लिट्त्सु दादे

र्धातोर्घः उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च उपदेशे किम् अधोगित्यत्र यथा स्यात्

दामलिहमात्मान मिच्छतीति दामलिह्यति ततः क्विप् दामलिट् अत्रमाभूत् एकाचो बशो भष् झ

षन्तस्य स्ध्वोः धातोरवयवो यो एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे परे पदान्ते च २०

एकाचोधातोरितिममानोधिकेरणोनान्वयेनतुहन्स्यात् गर्दभमाचष्टे गर्दभयति ततःक्विपुणि
लोपः गर्द्दप् रुल्लीतिनिर्देशतनम् स्थोर्थेहसासामर्थ्यात् तेनेहनतुगंचे होग्धा व्यपदेशिवद्भावेनया
तवयवत्वात् भष्भावः जस्त्वचर्त्वेधुक् धुग् दुहौ दुहः दुहा बवचर्त्वेधुत्तु वाडुहमुहस्नुहस्नि
हां एषांहस्यवाद्यःस्यात् रूलियदान्तोव धुक् धुग् धुट् धुड् दुहौ दुहः धुग्भ्याम् धुड्भ्याम्
धुत्सु धुटसु धुटत्सु एवंमुहस्नुहस्निहाम् इग्यणःसम्प्रसारणम् यणःस्थानेसुयुज्यमानो
यऽकसम्प्रसारणसंज्ञःस्यात् वाहऊठ् भस्यवाहःसम्प्रसारणमूठ्स्यात् सम्प्रसारणाच्चः
सम्प्रसारणादचिपूर्वरूपमेकादेशःस्यात् एत्येधत्यूठ्सुः विश्वौहः विश्वौहे त्यादि छन्दसेः
वर्णेनमस्यानेपरे
वर्णविदितिपदेशाजनाद्विच्च चतुरनडुहोरामुदात्तः अन्तयोरामसंचोदातः सावनडुहः अमसन्तु
मस्यात् सोपदेश्वरादित्यधिकारादर्वणेत्वबोयंतुम् अतोविशेषविहतेनापिनुमामन्तवाध्यते अमा
चतुरन्तवाध्यते सोलोपःनुमिधिसामर्थ्याद्दत्सुसासितिदत्वेन संयोगान्तलोपस्यासिद्दत्वान्नलो

आच्छीनद्योरितिसूत्रात् ... सावनडुह आच्छीनद्योरित्यतोनुममनुवर्त्यीदनुमस्यादिति॥९॥ विशेषविहितेनयामुटा
नलधातोरववव इतिवेधाधीकमेवना न्वयेपाहुवंतस्यदुहेर्दीसामान्यविहितःशीपुटद्दचा॥ विशेषविहितेनतुमा सामान्याविहितःआम्रवाध्यमां
देशितिघवेनऊथंततेवपिभ्रष्भावोनस्यात्॥ दधितिसमूहइत्याशंकांनिराकरोतिअवर्णत्यपरोयमित्यादिना॥ उपजीव्योपजीवकयोर्विरोधा
पस्यपःपर्वानयवोदुहसेकाच गतस्यऊथंतरत्वाभाते॥ऊथेतुतेरावयवेनदवशभावादित्यत आह व्यपदेशिवद्भावेनेति॥२॥ दाहपतिघतेहृते

सि०
यौन अनड्वान् अमुम्ममुङ्हौ चत्वारनडुहोरमस्यानसमुङ्हौ आमेयवादः हेअनड्डन् अनड्वाहौ क्स
सेसघ्रुंस्वनडुह्वांदः सान्तस्यवस्वन्तस्यसंसुद्देश्वदः स्यान्यदान्नेअनडुद्भ्याम् अनडुद्भिरि
२१
त्यादि सान्तोनिकि विद्वान पदान्तोनिकिम् स्रस्तम् ध्वस्तम् सहेः साड़ःसः सड्रूपस्ससहेः
सस्समहेत्यादेशः स्यात् तुरासाट् तुरासाड् तुरासाहौ तुरासाहः तुरासाड्भ्यामित्यादि तुरेस
हते इत्यर्थेकर्मस्तिसहइतिणिः लोकेतुसाहपतेः क्विप् अन्येषामपीति पूर्वपदस्यदीर्घः दिवऔत् दि
वितिप्रातिपदिकस्यौत्स्यात्सौपरे अल्विधित्वेनस्थानिवत्त्वाभावात् हल्ड्यादिलोपेन सुद्योः सु
दिवौ सुदिवः सुदिवम् सुदिवौ दिवउत् दिवोन्तादेश उकारः स्यात्सपदान्ते सुद्युभ्याम् सुद्युभिः चत्वा
रः चतुरः चतुर्भिः षड्चतुर्भ्यश्च षट्संज्ञकेभ्यश्चतुरश्चपरस्यामोनुडागमःस्यात् णत्वद्वित्वे चतुर्णा
म् रोःसुपि सप्तमीबहुवचनेपरे रोरेवविसर्जनीयोनान्यरेफस्य षत्वंषस्यद्वित्वेप्राप्ते शरोचि अचियि
रेशरोनद्वित्वं चतुर्षु प्रियचत्वा हे प्रियचत्वः प्रियचत्वारौ गौणत्वेनुट्नेष्यते प्रियचतुराम् ग्राप्रान्से
कैवारहोभ्यामित्येते
आगत्वान्नदंतस्योपिचतुरनडुहोरित्याम्॥१०॥
नवोहुदित्यत्र मकारस्य एकारः ईत्सिलोपे सिद्धे सिद्धम
द्वोःमेव लोपस्य वकः त्यकोत्वनपदे द्रूकोः स्मृत्वा
प्रहाणात॥१८॥
२१

नन्वत्र इमद् इत्येव वक्तव्यतां त्तिमिष्टिमादीनां द्विवंतानामत्तिप्रसंगवारणाय त्यदादीनामित्यनुवर्त्य त्यदादीनामिमः स्यादिति व्याख्यास्यते नानर्थक इति निषेधादल्लोन्त्यविधिर्न भविष्यतीति किं कारे

[illegible]

तेत्करोतीति तदा चक्रे इति णिचि रत्वडादिलोपः॥ णिजंतात्क्विपि णेरनिटीति णिलोपः एवं हलि लमाचक्षाणः सलिलं सलिलो सलिलइत्यादि बोध्यं॥ नन्वेवं तोयमाचक्षाण इत्यत्र तोयो तोयः इति यांता अपि सुसाध्या न चैवं रेफलोपाद्धलि लोपः पूर्वविप्रतिषेधेनेति यलोपः

शेनेत्यत आह अकच सहित स्यापीति॥

तस्मादेव परमचतुर्णाम् कमले कमलौ आचक्षाणः कमलः कलौ कमलः एवं कमन्स्य मोनो धातोः धातोर्मस्य नः स्यात् पदान्ते न तस्यासिद्धत्वान्नलोपो न प्रशाम्यतीति प्रशान् प्रशामौ प्रशामः प्रशान्भ्यामित्यादि किमः कः किमः कः स्याद्विभक्तौ अकच् सहितस्याप्ययमादेशः कः कौ के कानित्यादि सर्ववत् इदमो मः स्यात् सौ त्यदाद्यत्वापवादः इदो य् पुंसि इदम इदः स्थाने अयः स्यात् सौ पुंसि सो लोपः त्यदाद्यत्वं पररूपत्वम् इदस्य इदमो दस्य मः स्यात् विभक्तौ इमौ इमे त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः अनाप्यकः अककारस्य इदो न स्यादापि विभक्तौ [illegible] आपि विभक्तौ इदमः यकारेण प्रत्याहारः अनेन हलि लोपः अककारस्य इद इदो लोपः स्यादापि हलादौ नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे आद्यन्तवदेकस्मिन् १।१।२१ एकस्मिन् क्रियमाणं कार्यमाद्यविवान्तवत् स्यात् आभ्याम् नेदमदसोरकोः अककारयोरिदमदसोर्भिस ऐस् न स्यात् एभिः अनयोः निमित्तानाम् ऐसे पश्चाद्धलि लोपः अस्मै आभ्याम् एभ्यः अस्य अनयोः एषाम् अस्मिन् एषु ककारयोगे त्वयकम् इमकौ इमकेन इम

रेरोऽयं इति प्रथमं [illegible]

इमो अकारादि धौतत्वात् अकचकस इति रूपं स्यादिति भावः

॥३॥

[illegible]

हितो यः क्रतुस्तद्वाचिनामनपुंसकलिंगानां द्वंद्व एकवत्स्यात् अर्काश्वमेधम् अध्वर्युक्रतुः किम् इषुवज्रौ
सामवेदे विहितौ अनपुंसकं किं राजसूयवाजपेये अध्ययनतोऽविप्रकृष्टाख्यानां अध्ययने
न प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत् पदकक्रमकं जातिरप्राणिनां प्राणिवर्ज्जजातिवाचिनां द्वंद्व एकं
वत् धानाशष्कुलि प्राणिनां तु विट्शूद्राः द्रव्यजातीनामेव नेह रूपरसौ गमनाकुंचने जातिप्राधान्य एवा
यमेकवद्भावः द्रव्यविशेषविवक्षायां न बदरामलकानि विशिष्टलिंगो नदीदेशोऽग्रामाः ग्रामवर्ज्जनदी
देशवाचिनां भिन्नलिंगानां समाहारे द्वंद्वः स्यात् उद्ध्यश्च इरावती च उद्ध्येरावति गंगा च शोणश्च गंगाशो
णं कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं भिन्नलिंगानां किं गंगायमुने मद्रकेकया अग्रामाः किं जांबवं नग

सि॰कौ॰ रे शालूकिनीग्रामः जांबवशालूकिन्यौ क्षुद्रजंतवः एषां समाहारे द्वंद्वः स्यात् यूकालिक्षं आनकुलात् क्षुद्रजं
११ तवः येषां च विरोधः शाश्वतिकः एषां प्राग्वत् अहिनकुलं गोव्याघ्रं काकोलूकमित्यादौ परत्वात् विभा
109 षा वृक्षमृगेति प्राप्तं चकारेण बाध्यते शूद्राणामनिरवसितानां शूद्राणां प्राग्वत् तक्षायस्कारं पात्राद्
बहिष्कृतानां तु चंडालमृतपाः गवाश्वप्रभृतीनि च यथोच्चारितानि साधूनि गवाश्वं दासीदासमि
त्यादि विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां वृक्षादीनां सप्तानां द्वं
द्वः अश्ववडवेत्यादि द्वंद्वत्रयं च प्राग्वत् वृक्षादौ विशेषाणामेव ग्रहणं प्लक्षन्यग्रोधाः रुरुपृषतं रु
रुपृषताः कुशकाशं कुशकाशाः व्रीहियवं व्रीहियवाः दधिघृतं दधिघृते गोमहिषं गोमहिषाः
शुकबकं शुकबकाः अश्ववडवं अश्ववडवौ पूर्वापरं पूर्वापरे अधरोत्तरं अधरोत्तरे फलसेनावनस्पतिमृ ११

गशकुनिष्वङ्गेनयास्यरणानां वङ्गप्रोक्तुनिरेव द्वंद्व एकवदिति वाच्यं बदराणि चामलकानि च बदरामलकं
जातिरप्राणिनामित्येकवद्भावः नेह च बदरामलके रथिकाश्वारोहौ सेनाङ्गत्वात्क्तो यो द्वन्द्वादि विभाषावृक्षे
तिसूत्रे येऽप्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थं पशुग्रहणं हस्त्यश्वादि
षु सेनाङ्गत्वान्नित्ये प्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वंद्वः अन्यैस्तु सहेतरेतरयोग एवेति नियमा
र्थं मृगशकुनिग्रहणं पूर्वापरमधरोत्तरमित्यपि अश्ववडवग्रहणं द्विपदेन प्रसकार्थं अन्यथा पर
त्वात् पूर्वपदस्य वडवेति स्यात् विप्रतिषिद्धं चानधिकरणवाचि विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एक
वद्वा स्यात् वैकल्पिकः समाहारे द्वंद्वश्चार्थ इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवा
चिनामेवेति नियमार्थमिदं तेन द्रव्यवाचिनामितरेतरयोग एव शीतोष्णे उदके स्तः विप्रतिषिद्धं किम् नं

सि·कौ
१२
110

दकपावतनं इहपातिकः समाहारद्वंद्वोद्वेभवत्येव न द्धिपयआदी नि एतानि नैकवत्स्युः दधिपयसी
इध्मावर्हिषी निपातनात् दीर्घः हकारामेवाश्चनसे अधिकरणैतावत्त्ववहुत्वसंख्यावगमेएकवद्वेति
नियमोनस्यात् दृषदंतोष्ठाः विभाषासमीपे अधिकारणेतावत्त्वसामीप्येनयरिच्छेदेसमारयवेन्ने
वेरू पोनियमोवास्यात् उपदशादंतोष्ठं उपदशादंतोष्ठाः आनङृतो द्वंद्वे विद्यायोनिसंबंधवाचि
नामृदंतानांद्वंद्वे आनङ्स्याद् उत्तरपदेपरे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रेमत
रस्याभिज्ञतोमेदूकसृमापुत्रइत्यन्वयवृत्तेः पितापुत्रौ देवताद्वंद्वेच उद्गोत्तरपदेपरे आनङ् मित्रावरुणौ
वायुशब्दप्रयोगेप्रतिषेधेः अग्निवायूवाय्वग्नी पुनर्द्वंद्वग्रहणात्प्रसिद्धसाहचर्यस्येपरिग्रहार्थंतेनब्रह्म
प्रजापतीइत्यादौनानङ् एतद्धिनैकहविर्भागित्वेनश्रुतंनापिलोकेप्रसिद्धंसाहचर्यं इंद्राग्नीसोमवरुणा १२

यौः देवताद्वंद्व इत्येव अग्नेः स्तुत्सोमसोमाः अग्नेः परेषां मिषांसस्य षः स्यात्समासे अग्निवरुणौ इद्वृद्धौ वृद्धिमत्यु
रपदे अग्नेरिदादेशः स्याद्देवताद्वंद्वे अग्नामारुतौ देवतास्य आग्निमारुतं कर्म अग्नीवरुणौ देवतास्य आ
ग्निवरुणं देवताद्वंद्वे च उभयपदवृद्धिः अलौकिके वाक्ये आनङः ईत्वे च वा पितामहः वृद्धौ किम् आग्नेंद्रः ने
द्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः विसोमन अग्नावैष्णवं दिवो द्यावा देवताद्वंद्वे उत्तरपदे द्यावाभूमी द्या
वाक्षामे दिवसश्च पृथिव्यां दिवश्चेति चात् द्यावा आदेशः कारोच्चारणं सकारस्य रुत्वं मा भूत् इत्यर्थं द्यौश्च पृथि
वी च दिवस्पृथिव्यौ द्यावापृथिव्यौ छंदसि दृष्टानुविधि द्यावा चिदस्मै पृथिवी स्विदस्पृथिव्याः इत्यत्र परका
रा विसर्गे पदे उषासोषसः उषस् शब्दस्य उषासादेशः स्याद्देवताद्वंद्वे उषासासूर्यं मातरपितरावुदीचा
मुदीचां किं मातापितरौ द्वंद्वात् चुदषहांतात् समाहारे चवर्गांताद्दषहांताच्च द्वंद्वात् टच् स्यात् समाहारे वाक्

त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ इति द्वंद्वः अथैकशेषः सरूपाणां रा
मौ रामाः विरूपाणामपि समानार्थानां वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ कुटिलदंडौ वृद्धो यूना तल्लक्षण
श्चेदेव विशेषः यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् गार्ग्यश्च गार्ग्या
यणश्च गार्ग्यौ वृद्धः किम् गर्गगार्ग्यायणौ यूना किम् गर्गगार्ग्यौ तल्लक्षणः किम् गावित्तिः भागवित्ति
कौ कृत्स्ने किम् गार्ग्यवात्स्यायनौ स्त्री पुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् गार्गी च
गार्गीयणौ च गर्गाः अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक् दाक्षायणश्च दाक्षाः पुमान्स्त्रिया स्त्रि
या सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् भ्रा
ता च स्वसा च भ्रातरौ पुत्रश्च दुहिता च पुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् अक्लीबेन सहोक्तौ

क्तौ वं शिष्यते तच्चेद्वाचकवत्स्यात् तल्लक्षण एव विशेषश्चेत् भ्रातृः पदः स्वसृस्त्रीपदी भ्रातृवत्स्त्रंतदिदंस्

कृतानीमानि स्वसृदुहितृनि पितामात्रा मात्रा सहोक्तौ पिता वा शिष्यते माता च पिता च पितरौ मातापितरौ

श्वशुरः श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते श्वशुरौ श्वश्रूश्वशुरौ त्यदादीनि सर्वैर्नित्यम् सर्वैः स

होक्तौ त्यदादीनि नित्यं शिष्यन्ते स च देवदत्तश्च तौ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते स च यश्च

यौ पूर्वशेषोऽपि दृश्यत इति भाष्यम् स च यश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि सा च देवद

त्तश्च तौ तच्च देवदत्ता च यज्ञदत्ता च तानि पुंनपुंसकयोस्तु परत्वान्नपुंसके शिष्यते तच्च देवदत्तश्च ते

अद्वंद्वतत्पुरुषविशेषणानामिति वक्तव्यम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ तच्च सा च अर्द्धं

पिप्पल्यौ ते ग्राम्यपशुसंघेष्वतरुणेषु स्त्री पशुसंघविवक्षायां स्त्री शिष्यते पुमान् स्त्रियेत्यस्यापवादः

सि॰ कौ॰ ९४ गावश्चमाः ग्राम्येतिकिम् रुरवश्चमेपशुषुकिम् ब्राह्मणाश्चमेसंघेषुकिम् एतौगावौ अतरुणेषुकिम् वत्सा

112 इमे अनेकशफेष्विति वाच्यम् अश्वाश्चमेइहसर्वत्र एकशेषेकृतेऽनेकाभावाद्द्वंद्वेऽन्यतेन शिरसीशिरांसीस

दौसमासस्यंतोदात्तः प्राण्यंगत्वादेकवद्भावश्चनपंथानौ कश्यादौसमासांतोन इत्येकशेषः कृत्तद्धित

समासैकशेषसनाद्यंतधातुरूपाः पंचवृत्तयः परार्थाभिधानंवृत्तिः वृत्त्यर्थवोधकंवाक्यंविग्रहः सद्विधा

लौकिकोऽलौकिकश्चपरिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगानर्होऽसाधुरलौकिकः यथाराज्ञः पुरुषः

राजन् अस् पुरुष सु इति अविग्रहो नित्यसमासोऽस्वपदविग्रहोवा समासास्तुचतुर्द्धेतिप्रायोवादः अव्ययी

भावतत्पुरुषबहुव्रीहिद्वंद्वाधिकारबहिर्भूतानामपिसहसुपेतिविधानात् पूर्वपदार्थप्रधानोऽव्ययी

भावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानोबहुव्रीहिः उभयपदार्थप्रधानोद्वंद्वः इत्यपिप्रायोप्र १०४

वादः प्रायोभिप्रायः शाकप्रतिडन्मनगंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्विगावस्त्यादिवर्ज्जं श्रीहैदं
तोऽपूर्भित्यादिद्वंद्वे चाभावात् तत्पुरुषविशेषः कर्मधारयः तद्विशेषो द्विगुः अनेकपदत्वं द्वंद्वबहुव्री
ह्योरेव न तत्पुरुषस्य क्वचिदेवेत्युक्तम् किंच सुपांसुपा तिङा नाम्ना धातुनाथ तिङां तिङा सुबंतेनेति चत्वारः स
मासः षड्विधो बुधैः सुपा राजपुरुषः तिङा पर्यभूषत् नाम्ना कुंभकारः धातुना कटप्रूः अजस्रं तिङां तिङापि
बतखादता खादतमोदता तिङां सुपा कृंतविचक्षणा तिष्ठसा क्रियायां साकृतं वितन्तण पहीञादयो न्यपदा
र्थे इति मयूरव्यंसकादौ पाठात्समासः इति सर्वसमासशेषः अकृ पूरब्धूः पथामानते अग्रनते इतिच्छेदः
अगात्येतत्समासस्य प्रत्ययोनावयवः स्यात् अदेपाप्स्त्वदंतस्यतन अर्हर्चः अनचवबह्वृचावध्येतर्ये
व नेह अनकसाम बहृकत्रुत्युक्तम् विष्णोः पूः विष्णुपुरम् ज्ञावत्वं लोकात् विमलापं सरः धातरुपसर्गेभ्यो अपर्ई

त् अपप्रकृतिकृतसमासांतस्यानुकरणम् षष्ठ्यर्थप्रथमाराभोऽपसर्गत्यात् द्विर्गता आपोऽस्मिन्निति द्वीपम् अं
तरीपम् प्रतीपम् समीपम् समापो देवयजनमिति समा आपोऽस्मिन्निति वोध्यम् इतसमासांतग्रह
णान्नेह स्वपुरूपी अवर्णांतादा प्रेयंपरेयं प्रापम् परापम् ऊदनोर्देशे अनोपरस्य ऊत्स्यादेशे अनू
पो देशः राजधुरं अक्षे तु अक्षधूः दृढधूरक्षः सखिपथः रम्यपथो देशः अच् प्रत्यन्ववपूर्वात्सामलोम्नः
एतत्पूर्वात्साम लोमांतात्समासादच्स्यात् प्रतिसामम् अनुसामम् अवसामम् प्रतिलोमम् अनुलो
मम् अवलोमम् कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते कृष्णभूमः उदग्भूमः पाण्डुभूमः द्विभू
मः त्रिभूमः प्रासादः संख्याया नदीगोदावरीभ्यां च पंचनदम् सप्तगोदावरम् अजिति योगविभा
दन्यत्रापि पद्मनाभः अक्ष्णोऽदर्शनात् अचतुर्पर्यायादक्ष्णोऽच्स्यात्समासांतः गवामक्षीव गवाक्षः अ ९५

चतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहृक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं
दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः एते पंच
विंशतिरजंतानि पात्यंते आद्यास्त्रयो बहुव्रीहयः अविद्यमानानि चत्वार्यस्य अचतुरः विचतुरः सुचतुरः
सुपाम्भो चतुरजिष्यते त्रिचतुराः चतुराः चतुरोंसमीपे उपचतुराः ततेपकादश द्वंद्वाः स्त्रीपुंसौ धेन्वनडुह
म् ऋक्सामे वाङ्मनसे अक्षिणी च भ्रुवौ चाक्षिभ्रुवम् दाराश्च गावश्च दारगवम् ऊरू च अष्ठीवंतौ च ऊर्वष्ठी
वम् निपातनाट्टिलोपः पदष्ठीवम् निपातनात्सदशावृत्सप्राद्भावः नक्तं च दिवा च नक्तंदिवम् रात्रौ च दिवा च
रात्रिंदिवम् रात्रेर्मांतत्वं निपात्यते अहनि च दिवा च अहर्दिवम् वीप्सायां द्वंद्वो निपात्यते अहन्यहनीत्यर्थः
सरजसमिति साकल्ये ऽव्ययीभावः बहुव्रीहौ न सरजः पंकजम् निश्चितं श्रेयो निःश्रेयसम् तत्पुरुष एवेष्ट

निःश्रेयान्पुरुषःपुरुषस्यायुःपुरुषायुषम् ततोद्विगुः द्व्यायुषम् त्र्यायुषम् ततोद्वंद्वः ऋग्यजुषम् ततस्तत्पुरुषःकर्मधार
यःजातोक्षःमहोक्षःवृद्धोक्षःशुनःसमीपंउपशुनंटिलोपाभावःसंप्रसारणंचनिपात्यतेगोष्ठश्वागोष्ठश्वः ब्रह्म
हस्तिभ्यांवर्चसः अच्स्यात् ब्रह्मवर्चसम् पल्यराजभ्यांचेतिवक्तव्यम् पल्यवर्चसम्राजवर्चसम् अवसमंधे
भ्यस्तमसः अवतमसम् संतमसम् अंधयतीत्यंधम् पचाद्यच् अंधंतमोऽधतमसम् श्वसोवसीयश्रेयसः॥व
सुशब्दःप्रशस्तवाचीततोऽयसुन्वसीयःश्वःशब्दउत्तरपदार्थप्रशंसामाशीर्विषयमाहमयूरव्यंसकादि
त्वात्समासःश्वोवसीयसंश्वःश्रेयसंतेभ्यस्यात् अन्ववतप्ताद्रहसः अनुरहसंअवरहसम्तप्तरहसम् प्रतेरु
रसः सप्तमीस्थात् उरसि[प्रति]प्रत्युरसम्विभक्त्यर्थेऽव्ययीभावः अनुगवमायामे एतन्निपात्यतेदीर्घत्वे अनु
गवंयानंयस्यचायामइतिसमासः द्विस्तावात्रिस्तावावेदिःअच्प्रत्ययष्टिलोपःसमासश्चनिपात्यतेयावती १९

प्रकृतौवेदिःततोद्विगुणात्रिगुणावाश्वमेधादौतत्रेदंनिपातनम् वेदिरितिकिम् द्विस्रवतीत्रिस्रावतीरज्जुः उपसर्गा
दध्वनः प्रगतोध्वानंप्राध्वोरथः नपूजनात् पूजनार्थात्परेभ्यःसमासान्तानस्युःसुराजा अतिराजा स्वतिभ्यामेव
नेहपरमराजः पूजनात्किम् गामतिक्रान्तोतिगवः बहुव्रीहौसक्थ्यक्ष्णोरित्यतःप्रागेवायंनिषेधःनेह
सुसक्थःस्वक्षः किमःक्षेपे क्षेपेयःकिम्शब्दस्ततःपरंयत्तदंतात्समासांतानस्युःकुत्सितोराजाकिंराजाकिंस
खाकिंगौःक्षेपेकिम् किंराजः किंसखः किंगवः नञस्तत्पुरुषात् समासांतोन अराजा असखा तत्पुरुषात्कि
म् अधुरम् शकटम् पथोविभाषा नञ्पूर्वात्पथोवासमासांतः अपथम् अपंथाःतत्पुरुषादित्ये
व अपथोदेशः अपथेवर्त्मनेइतिसमासांताः अलुगुत्तरपदे अधिकारःप्रागानङः उत्तरपदाधि
कारस्त्वापादसमाप्तेः पंचम्याःस्तोकादिभ्यः एभ्यःपंचम्याअलुक्स्यादुत्तरपदेस्तोकान्मुक्तः एवमेति

सि.कौ.
९०
115

कार्यहरार्थकुत्स्नेभ्यः उत्तरपदे किम् निष्क्रान्तस्तोकान्निस्तोकः ब्राह्मणाच्छंसिन उपसंख्यानम् ब्राह्मणे विहिता
निशस्त्राण्युपचारात् ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः द्वितीयार्थे पंचम्युपसंख्यानादे
व ओजःसहोम्भस्तमसस्तृतीयायाः ओजसाकृतमित्यादि अंजसउपसंख्यानम् अंजसाकृतम् आर्जवेनकृ
तमित्यर्थः पुंसानुजो जनुषांधइतिच अस्याग्रजः पुमाननुजः जनुषान्धो जात्यंधः मनसः संज्ञा
याम् मनसागुप्ता आज्ञायिनिच मनसइत्येव मनसा आज्ञातुंशीलमस्य मनसाज्ञायी आत्मनश्च आ
त्मनस्तृतीयाया अलुक्स्यात् पूरण इति वक्तव्यम् पूरणप्रत्ययांते उत्तरपदे इत्यर्थः आत्मनापंचमः जना
र्दनस्त्वात्मचतुर्थ एवेतिलिंगवद्व्रीहिर्वा अथ पूरणे किं आत्मकृतम् वैयाकरणाख्यायांचतुर्थ्याः आत्मनश्चे
व आत्मनेपदम् आत्मनेभाषा तादर्थ्ये चतुर्थी चतुर्थीतियोगविभागात्समासः परस्यच परस्मैपदं पर ९०

सैभाषा हलदंतात्सप्तम्याः संज्ञायाम् हलदंताच्चसप्तम्या अलुकसंज्ञायाम् त्वचिसारः गवियुधिभ्यांस्थिरः
आभ्यांस्थिरस्यसस्यषःस्यात् गविष्टिरः अत्रगवीतिवचनादेवालुक्युधिष्ठिरः अरण्येतिलकः अत्रसंज्ञायामिति
सप्तमीसमासः हृद्युभ्यांच हृदिस्पृक् दिविस्पृक् कारनाम्निप्राचांहलादौ प्राचांदेशेयत् कारनामतत्रहला
दावुत्तरपदेहलदंतात्सप्तम्याअलुक् मुकुटेकार्षापणम् दृषदिमाषकः पूर्वेणसिद्धेनियमार्थंकारनाम्न्येव
प्राचामेवहलादावेवेतिकारनाम्निकिम् अभ्यर्हितपशुःकरादन्यसैतद्वयस्यनामप्राचांकिम् यूथपशुःह
लादौकिम् अविकटेउरणः हलदंतात्किम् नद्यांदोहः नदीदोहः मध्याद्गुरौमध्येगुरुः अंतात्त्र अंतेगुरुः अ
मूर्धमस्तकात्स्वांगादकामे कंठेकालः उरसिलोमा अमूर्धमस्तकात्किम् मूर्धशिखः मस्तकशिखः अकामे
किम् मुखेकामोस्यमुखकामः बंधेचविभाषा हलदंतात्सप्तम्याअलुक् हस्तेबंधः हस्तबंधः हलेदत्तेति

सि॰कौ॰ १८ 116 किम् गुप्तिबन्धः तत्पुरुषे कृति बहुलम् स्तंबेरमः कर्णेजपः क्वचिन्न कुरुचरः प्रावृट्शरत्कालदिवां जे प्रावृषिजः श
रदिजः कालेजः दिविजः पूर्वाह्णापराह्णाऽऽर्द्रामूलप्रदोषावस्करात् पञ्च विभाषा वर्षक्षरशरवरात् वर्षेजः वर्षजः क्षरे
जः क्षरजः शरेजः शरजः वरेजः वरजः घकालतनेषु कालनाम्नः सप्तम्या विभाषा अलुक् स्यात् पूर्वाह्णे
तरे पूर्वाह्णतरे पूर्वाह्णेतमे पूर्वाह्णतमे कालः पूर्वाह्णेकाले पूर्वाह्णकाले तने पूर्वाह्णेतने पूर्वाह्णतने शयवा
सवासिष्वकालात् खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी अपो योनियन्मतिषु
अप्सुयोनिः अप्सुमतिः अप्सव्यः अप्सुमन्तावाज्यभागौ नेन्सिद्धबध्नातिषु च इन्नन्ते उत्तरपदे
दिषु सप्तम्या अलुक् न स्थण्डिलशायी सांकाश्यसिद्धः चक्रबन्धः स्थे च भाषायां सप्तम्या अलुङ् न समस्थः
भाषायां किम् कृष्णोऽस्यास्तेरेष्टः षष्ठ्या आक्रोशे चौरस्यकुलम् आक्रोशे किम् ब्राह्मणकुलम् वाग्दिक्प १८

श्वपुच्छो युक्तिं दंडहरेषु वाचोयुक्तिः दिशोदंडः पश्यतोहरः आमुष्यायणः आमुष्यपुत्रिकामुष्यकुलिकेति च अमु
ष्यापत्यमामुष्यायणः नडादित्वात्फक् अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका मनोज्ञादित्वाद्वुञ् एवमामुष्य कु
लिका देवानांप्रियः मूर्खः अन्यत्र देवप्रियः शेपपुच्छलांगूलेषु शुनः शुनःशेपः शुनोलांगूलः शुनःपुच्छः दि
वश्च दासे दिवोदासः पुत्रेन्यतरस्याम् षष्ठ्याः पुत्रे लुग्वा निंदायाम् दास्याःपुत्रो दासीपुत्रः निंदायां किं ब्राह्म
णीपुत्रः ऋतो विद्यायोनिसंवंधेभ्यः विद्यासंवंधयोनिसंवंधयोनिसंवंधवाचिन ऋदंतात्षष्ठ्याः अलुक्
होतुरंतेवासी होतुःपुत्रः पितुरंतेवासी पितुःपुत्रः विद्यायोनिसंवंधेभ्यस्तत्पूर्वोत्तरपदग्रहणम् नेह हो
तृधनम् पितृगृहम् विभाषा स्वसृपत्योः ऋदंतात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः मातुः पितुर्भ्या
मन्यतरस्याम् आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे मातुःष्वसा मातुःस्वसा पितुःष्वसा पितुःस्वसा लुग्पक्षे

त्रे मातृपितृभ्यां स्वसा मातृपितृभ्यां स्वसुः सस्य षः स्यात्समासे मातृष्वसा पितृष्वसा असमासे तु मातुः स्वसा पितुः स्वसा इमसु
वसमासः घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः
स्यात् घरूपकल्पप्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु ब्राह्मणितरा ब्राह्मणितमा ब्राह्मणिरूपा ब्राह्मणि
कल्पा ब्राह्मणिचेली ब्राह्मणिब्रुवा ब्राह्मणिगोत्रेत्यादि ब्रूञः पचाद्यच् वचादेशगुणयोरभावोपि निपातनेन
चेलादीनि वृत्तिविषये कुत्सनवाचीनि तैः कुत्सितानि कुत्सनैरिति समासः ङ्यः किम् दत्तातरा भाषितपुंस्का
त्किम् आमलकीतरा कुवलीतरा कुवलीतरा नद्याः शेषस्यान्यतरस्याम् अङ्यन्तनद्याः अनेकाचश्च श्रेयादिषु ह्र
स्वो वा स्यात् ब्रह्मबन्धूतरा ब्रह्मबन्धुतरा स्त्रीतरा स्त्रितरा ङित्वयानलक्ष्मीतरा उगितश्च उगितः परा या नदीत
दन्तस्य घादिषु ह्रस्वो वा स्यात् विदुषितरा ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत् विद्वत्तरा घ्न्यादिषु तु विदुषी १८

तेरेयणुदष्टंतेनन्निर्मलम् हृदयस्यहृल्लेखयदण्लासेषु हृदयंलिखतीतिहृल्लेखः हृदयस्यप्रियंहृद्यम् हृदयस्येदंहार्दम् हृल्ला
सः लेखेयण्णेतस्यग्रहणम् घञिनहृदयलेखः लेखग्रहणमेवज्ञापकम् उत्तरपदाधिकारेनदंतविधिर्नास्तीतिवाशो
कष्यञ्रोगेषु हृच्छोकः हृदयशोकः हृदयशोकः सौहार्द्यम् सौहृदयम् हृद्रोगः हृदयरोगः हृदयशब्दपर्यायोहृत्क
व्द्रोप्यस्तितेनसिद्धेप्रपंचार्थमिदम् पादस्यपदाज्यातिगोपहतेषु पश्चत्तरपदेषुपादस्यपद्इत्ययंनादेशः पादाभ्या
मजतीतिपदाजिः पदातिः अजतिभ्यांपादेचेतीणप्रत्ययः अजेर्व्यभावोनिपातनात् पदगः पदोपहतः पद्यत्यतदर्थे
पादस्ययत्यादतदर्थेयतिपरेपादेशोविध्यंतिपद्याः शर्कराः अतदर्थेकिम् पादार्थमुदकंपाद्यम् इकेचरताउपसं
ख्यानम् पादाभ्यांचरतिपदिकः पर्यादिनाष्ठन् हिमकाषिहतिषुच पद्धिमम्पकाषीपद्धतिः ऋचःशेऋचःपाद
स्यपत्स्यात्केपरेगायत्रीचतुःशेसतिपादंपादमित्यर्थः ऋचःकिम् पादशः कार्षापणंददाति वाघोषमिश्रशब्देषु

का॰ वृ॰
ष॰
१८
118

पादस्यपतवोपहोषः पादघोषः पन्मिश्रः पादमिश्रः पच्छब्दः पादशब्दः निष्केतिवक्तव्यम् पन्निष्कः पादनिष्कः उदकस्योदः
संज्ञायाम् उदमेघः उत्तरपदस्येतिवक्तव्यम् क्षीरोदः पेषंवासवाहनधिषुच उदपेषंपिनष्टि उदवाहनः उदधिर्घटः
समुद्रेतुपूर्वेणसिद्धम् एकहलादौपूरयितव्येन्यतरस्याम् उदकुंभः उदककुंभः एकेतिकिम् उदकस्थाली पूरयि
तव्ये किम् उदकपर्वतः मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषुच उदमंथः उदकमंथः उदौदनः उदकौ
दनः इकोह्रस्वोऽङ्यो गालवस्य इगंतस्याङ्यंतस्य ह्रस्वोवास्यादुत्तरपदे ग्रामणिपुत्रः ग्रामणीपुत्रः इकः किम् रमा
पतिः अङ्य इतिकिम् गौरीपतिः गालवग्रहणंपूजार्थम् अन्यतरस्यामित्यनुवृत्तेः इयङुवङ्भाविनामव्ययानांच
नेतिवाच्यम् श्रीमदः भ्रूभंगः शुक्लीभावः भ्रूकुंसादीनामितिवक्तव्यम् भ्रुकुंसः भ्रुकुटिः भ्रूकुंसः भ्रूकुटिः अका
रोनेनविधीयतेइति आख्यातरं भ्रकुंसः भ्रकुटिः भ्रुवाकुंसोभाषणंशोभावायस्यसः स्त्रीवेषधारीनर्तकः भ्रुवंकु १८

दिः कौटिल्यं एकतद्धिते च एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च एकस्या आगतम् एकरूप्यम् एकक्षीरम् ङ्यापोः सं
ज्ञाछंदसोर्बहुलम् रेवतिपुत्रः अजक्षीरम् त्वे च त्वप्रत्यये ङ्यापोर्वा ह्रस्वः अजत्वम् ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरु
षे ष्यङंतस्य पूर्वपदस्य संप्रसारणं स्यात् पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे संप्रसारणस्य संप्रसारणस्य दीर्घः स्यादु
त्तरपदे कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः व्यवस्थितविभाषया ह्रस्वेन स्त्रीप्रत्यये चानुप
सर्जनेनेति तदादिनियमप्रतिषेधात् परमकारीषगंधीपुत्रः उपसर्जने तु तदानियमोऽस्त्येव अतिकारीषगंध्या
पुत्रः बंधुनि बहुव्रीहौ बंधुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ कारीषगंध्या बंधुरस्येति कारीषगंधी
बंधुः बहुव्रीहौ किम् कारीषगंध्यायाः बंधुः कारीषगंध्याबंधुः क्लीवनिर्देशात् शब्दस्वरूपापेक्षया मातच्मा
तृकमातृषु वा कारीषगंधीमातः कारीषगंध्यामातः कारीषगंधीमातृकः कारीषगंध्यामातृकः कारीषगंधी

सि॰ कौ॰ मातांकारीषगंध्यामाता अस्मादेवनिपातनात् मातृशब्दस्य मातज्ञादेशःकच्चिकल्पश्चवहुव्रीहौविवेदम् कारीषगंध्या हे॰
१११ याः मताकारीषगंध्यामाता वित्तस्तामर्थात् वित्सरोवहुव्रीहिस्वरेणाद्येत इष्टकेषीकामालानांचिततूलभारिषु इष्ट
कादीनांतदंतानांचपूर्वपदानांचितादिषुउत्तरपदेषुह्रस्वःस्यात् इष्टकचितम् पक्वेष्टकचितम् इषीकतूल
म् मुंजेषीकतूलम् मालभारी उत्पलमालभारी कोरसमासादस्य मस्यात् सत्यंकारः अगदंकारः अस्तोस्त्विति
वक्तव्यम् अस्तुंकारः धेनोर्भव्यायाम् धेनुंभव्या लोकस्यपृणे लोकंपृणः पृणइतिमूलविभुजादित्वात्कः
इत्येनभ्यासस्य अनभ्यासमित्यः इरतःपरिहर्त्तव्य इत्यर्थः भ्राष्ट्राग्न्योरिंधे भ्राष्ट्रमिंधः अग्निमिंधः गिलेऽगि
लस्य तिमिंगिलः अगिलस्य किम् गिलगिलः गिलगिलेच तिमिंगिलगिलः उष्णभद्रयोःकरणे उष्णंकरण
म् भद्रंकरणम् रात्रेःकृतिविभाषा रात्रिंचरः रात्रिचरः रात्रिमटः रात्र्यटः अखिदर्थमिदंसूत्रम् खितित्वनु ह

द्विषदितिनित्यमेवबद्यते रात्रिंमन्यः सहस्यसः संज्ञायाम् उत्तरपदेसपलाशम् संज्ञायाकिम् सहयुध्वा ग्रंथांता
ताधिकेच अनयोरर्थयोसहस्यसः स्यादुत्तरपदेसमुहूर्त्तंज्योतिषमधीतेसद्रोणाखारी द्वितीयेचानुपाख्ये अ
नुमेयेद्वितीयेसहस्यसः स्यात् सराक्षसीकानिशाराक्षसीसाक्षादनुपलभ्यमाना निशयाऽनुमीयते समानस्य
छंदस्यमूर्धप्रभृत्युदर्केषु समानस्यसः स्यादुत्तरपदेनतुमूर्धादिषु अनुभ्राता सगर्भ्यः अनुसखासयूथ्यः योनःस
नुत्यः तत्रभवइत्यर्थेगर्भसयूथसनुताद्यत् अमूर्धादिषुकिम् समानमूर्धासमानप्रभृतयः समानोदर्काःस
मानस्येतियोगोविभज्यते तेनसपक्षःसाधर्म्यंसजातीयइत्यादिसिद्धमितिकाशिका अथवासहशब्दःस
म दृशवचनोस्तिसदृशः सख्यासखीतियथातेनायमस्वपदविग्रहोबहुव्रीहिः समानःपक्षोयस्येत्यादि ज्योतिर्ज
नपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु एषुद्वादशसूत्तरपदेषुसमानस्यसः स्यात् सज्योतिःस

जनपदरुत्यदिचरणेब्रह्मचारिणि॥ ब्रह्मचारिण्युत्तरपदेसमानस्यसः स्यात्चरणेसमानत्वेनगम्यमानेचरणःशा
खाब्रह्मवेदस्तदध्ययनार्थंव्रतमपिब्रह्मतच्चरतीतिब्रह्मचारीसमानःसब्रह्मचारी तीर्थेये तीर्थेउत्तरपदेया
दौप्रत्ययेविवक्षितेसमानस्यसः स्यात्सतीर्थ्यःएकगुरुकः समानतीर्थेवासीतियत्प्रत्ययःविभाषोदरे या
दौप्रत्ययेविवक्षितेतदुत्तरेवसोदर्यःसमानोदर्यः दृग्दृशवतुषु सदृक्सदृशः दृक्षेचेतिवक्तव्यम्सदृक्षः
वतुरुत्तरार्थः इदंकिमोरीश्की दृग्दृशवतुषुइदमईश्किमःकीस्यात् ईदृक् ईदृशःकीदृक्कीदृ
शः वतुदाहरणंवक्ष्यतेदृक्षेच ईदृक्षःकीदृक्षः आसर्वनाम्नः तादृक्तादृशःतावान्तादृक्षःदीर्घःमतो
त्ते अमदृक्अमदृशःअमदृक्षः समासेंगुलेःसंगः अंगुलीषङ्गोत्सेगस्यसस्यमूर्द्धन्यःस्यात्समासेअंगुली
षंगःसमासेकिम् अंगुलेःसंगः भीरोस्थानम् भीरुष्ठाव्यादात्स्थानस्यसस्यमूर्द्धन्यःस्यात्समासे भीरुष्ठानम्

घसमासेत्वभीरोस्थानम् ज्योतिरायुषः स्तोमः आभ्यांस्तोमस्य सस्य मूर्द्धन्यः स्यात्समासे ज्योतिष्टोमः आयुःष्टोमः स
मासे किम् ज्योतिषः स्तोमः सुषामादिषु च सस्य मूर्द्धन्यः शोभनं साम यस्य सुषामा सुषेधिः पतिसंज्ञायामगात्
समासस्य मूर्द्धन्यः हरिषेणः पत्ति किम् हरिसक्थ्यः संज्ञायां किम् पृथुसेनः अगकारात्किम् विष्वक्सेनः उप
कारित्येव सर्वसेनः नक्षत्राद्वा रातिसंज्ञायामगकारान्मूर्द्धन्यो वा रोहिणीषेणः रोहिणीसेनः अगकारात्कि
म् शतभिषक्सेनः आकृतिगणोयम् अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकार
करागच्छेषु अन्यस्य दुगागमः स्यादाशीरादिषु परेषु अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्यदु
त्सुकः अन्यदूतिः अन्यद्रागः अषष्ठ्यादि किम् अन्यस्य अनेन वा आशीरन्याशीः कारके छे च पं निषेधः अन्यस्य
कारकोन्यत्कारकः अन्यस्यापमन्यदीयः गहादेराकृतिगणत्वाच्छः अर्थे विभाषा अन्यदर्थः अन्यार्थः कोः कत्तत्पु

रुषेपि अजादावुत्तरपदे कुत्सितोश्वः कदश्वः कदन्नम् तत्पुरुषे किम् कुष्ट्रो राजा त्रौ च कुत्सितास्त्रयः कत्त्रयः रथव
दयोश्च कद्रथः कद्वदः तृणे च जातौ कत्तृणाम् का पथ्यक्षयोः कापथम् काक्षः अतच्छब्देन तत्पुरुषः अदिशब्दे
न बहुव्रीहिर्वा ईषदर्थे ईषज्जलम् काजलम् अजादावपि परत्वात्कादेशः काम्लः विभाषा पुरुषे कापुरुषः कु
पुरुषः अप्राप्तविभाषेयम् ईषदर्थे हि परं विप्रतिषेधान्नित्यमेव कवं चोष्णे उष्णशब्दे उत्तरपदे कवं का च वा स्या
त् कवोष्णम् कोष्णम् कदुष्णम् पृषोदरादीनि यथोपदिष्टम् पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव
साधूनि पृषतः उदरं पृषोदरम् तलोपः वारिवाहकः बलाहकः पूर्वपदस्य बः उत्तरपदादेश्च लत्वम् भवेद्
वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् दिक्शब्देभ्यस्तीरस्य तारभावो वा द
क्षिणतारम् दक्षिणतीरम् उत्तरतारं उत्तरतीरम् दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेष्टुत्वं चाडः खेनदास्यते ह ११३

डाशः दुःखेन नाश्यते दूणाशः दुःखेन दभ्यते दूडभः खल त्रिभ्यः दभेर्नलोपो निपात्यते दूढ्यः ध्यायतीति दूढ्यः आत्म्ये
निकः वुवेनास्मांसीदंतिवृसीवुवछवृसवृ आदेशः सदेरधिकरणेऊड् आकृतिगणोयम् संहितायाम् अधिकारो
यम् कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य कर्णशब्दे परे लक्षणवाचकस्य दीर्घः द्विगुण
कर्णः लक्षणस्य किम् शोभनकर्णः अविष्टादीनां किम् विष्टकर्णः अष्टकर्णः पंचकर्णः मणिकर्णः भिन्नकर्णः
छिन्नकर्णः छिद्रकर्णः स्रुवकर्णः स्वस्तिककर्णः नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ क्विबंतेषु पूर्व——
स्य दीर्घः ——उपानत् नीवृत् प्रावृट् मर्माविध् नीरुक् ऋतीषट् परीतत् क्वाविति किम् विभाषा पुरुषे इत्यतो
मंडूकप्लुत्या विभाषानुवर्त्तते सा च व्यवस्थिता तेन गतिकारकयोरेव नेह पटुरुक् तिग्मरुक् वनगिर्योः संज्ञायां
कोटरकिंशुलकादीनाम् कोटरादीनां वने परे किंशुलकादीनां गिरौ परे दीर्घः स्यात् संज्ञायां वने कोटरा मिश्रकासि

सि॰कौ॰
११४
122

शुकाशारिकाकोटराग्रेभ्यः वनशब्दस्योत्तरपदस्याभ्यपवणात्वंनतन्येभ्यः इह कोटरान्ताः पंचदीर्घविधौकोटरादयो

वोध्याः तेषोक्तनदीर्घाणांणत्वविधौ निर्देशो नियमार्थः अग्रेशब्दस्तत्वविधर्थः पुरगावणम् मिश्रकावणम् सि

श्रकावणम् शारिकावणम् कोटरावणम् वनस्याग्रे अग्रेवणम् राजदंतादिषु निपातनात्सप्तम्या अलुक प्रा

तिपदिकार्थमात्रे प्रथमा पञ्चम्यर्थे वेति किम् असिपत्रवनम् किंशुलकागिरिः वलेवलप्रत्ययेपरे दीर्घः स्यात् नेहवल

यवतीशरादीनां च शरावती वंशावती कोटरावती शकटेः पीलोः अंगनस्य दीर्घः स्याद्वहे ऋषीवहम् कपीवहम् [illegible] इकः

किम् पिंडवहम् अपीलोः किम् पीलुवहम् अपील्वादीनामिति वाच्यम् देव दारुवहम् उपसर्गस्य घञ्यमनुष्ये वा

हुलम् उपसर्गस्य दीर्घः स्यात् घञंतेन त्वमनुष्ये परियाकः परीपाकः अमनुष्ये किम् निषादः इकः काशे अंगतस्यो

पसर्गस्य दीर्घः स्यात्काशे वीकाशः नीकाशः इकः किम् प्रकाशः अष्टनः संज्ञायाम् उत्तरपदे दीर्घः अष्टापदम् संज्ञा

कृषीवलः
मतौ बह्वचोऽन
जिरादीनाम् (१)
अमरावती। अन
जिरादीनां किम्
अजिरवती।। बहु
चः किम् ... व्रीहि
मती।। संज्ञा
यामित्येव।। ४

किम् अष्टपुत्रः चितेः कपि एकचितीकः द्विचितीकः नरे संज्ञायाम् विश्वानरः मित्रे चर्षौ विश्वामित्रः ऋषिः किम्
विश्वमित्रो माणवकः ऋन्तोदंतदंष्ट्राकर्णाकुंदवाराहपुछपदेषु दीर्घो वाच्यः स्वादेतः इत्यादि प्रनिरंतःशरे
क्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योसंज्ञायामपि एभ्यो पानस्यैव दीरपाने दीरपाणे गिरिनद्यादीनां वा
गिरिनदी गिरिणदी चक्रनितंबा चक्रणितंबा प्रातिपदिकांतनुम् विभक्तिषु चैव नस्य णत्वं स्यात् प्रवणम् कार्ष्य
वणः इह घात्यरत्वास्सतम् विभाषौषधिवनस्पतिभ्यः एभ्यो वनस्य णत्वं वा स्यात् दूर्वावणं दूर्वावनम् शिरीषव
नम् द्व्यच्त्र्यज्भ्यामेव नेह देवदारुवनम् इरिकादिभ्यः प्रतिषेधो वक्तव्यः इरिकावनम् गिरिकावनम् वा
मा हनमाहितात् आरोप्यं यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहनकारस्य णत्वं स्यात् इक्षुवाहणम् आहितात्किम्
इन्द्रवाहनम् इंद्रस्वामिकं वाहनमित्यर्थः वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात् पानं देशे पूर्वपदस्थान्निमित्तात्

सि॰कौ॰
११५
123

रस्य पानस्य णत्वं स्याद्देशे गम्ये क्षीरं पाणं येषां ते क्षीरपाणा उशीनराः सुरापाणाः प्राच्याः पीयत इति पानम् कर्मणि ल्यु

ट् वा भावकरणयोः पूर्वपदस्थान्निमित्तात्परस्यैषु स्थितस्य नस्य णो वा स्यात् प्रातिपदिकांते माषवापिणौ नु

मि व्रीहिवापाणि विभक्तौ माषवापेण वद्वे माषवापिना वित्यादि उत्तरपदं यत्प्रातिपदिकं तदंतस्यैव णत्वं नेह

गर्गाणां भगिनी गर्गभगिनी अत एव नुम् ग्रहणम् अंगस्य नुम् विधानात् तदंतत्वाद्धिनुम् न तदुत्तरपदस्य किंच

च प्रहिण्वन्नित्यादौ हिन्वेर्नुमो णत्वार्थमपि नुम् ग्रहणं प्रेन्वनमित्यादौ इन्व आदित्वान्न युवादेर्न रम्यूनापरि

पक्वानि पक्वात्तत्तरपदेणः नित्यमिमुक्रम् वृत्रहणौ हमिंमानयतीति हरिमाणि नुमि क्षीरपाणि विभक्तौ क्षीरपे

णस्य विणाक्रमति च कवर्गवत्युत्तरपदे प्राग्वत् हरिकामाणौ हरिकामाणि हरिकामेण पदव्यवायेपि पदेन व्यव

धाने णत्वं न स्यात् माषकुंभवापेन चतुरंगयोगेन अतद्धित इति वाच्यम् आर्द्रगोमयेण शुष्कगोमयेण कुसुंभवृ ११५

णाजातिः अत्र सुट् निपात्यते कुस्तुंबुरूणि धान्यं क्लीवत्वमत्रेष्टम् जातिः किम् कुतुंबुरूणि कुत्सितानि तिंडुकानीत्यर्थः
अपरस्पराः क्रियासातत्ये सुट् निपात्यते अपरस्पराः सार्था गच्छंति सततमविच्छेदेन गच्छंतीत्यर्थः क्रियेति किम्
अपरपरा गच्छंति अपरे च परे च सकृदेव गच्छंतीति गोष्पदं सेवितासेवितप्रमाणेषु सुट् सत्वं च निपात्यते गा
वः पद्यंते यस्मिन्देशे स गोभिः सेवितो गोष्पदः असेविते अगोष्पदान्यरण्यानि प्रमाणे गोष्पदमात्रं क्षेत्रम् सेवीति
ति किम् गोः पदम् आस्पदं प्रतिष्ठायाम् आत्मयापनाय स्थाने सुट् निपात्यते प्रेति किम् आपदापदम् आ
श्चर्यमनित्ये अद्भुते सुट् आश्चर्यं यदि स भुंजीत अनित्ये किम् आचर्यं कर्म शोभनम् वर्चस्केऽवस्करः कुत्सिते वर्चो
वर्चस्कोऽन्नमलम् तस्मिन् सुट् अवकीर्यत इत्यवस्करः वर्चस्केति किम् अवकरः अपस्करो रथांगम् अपकरोऽन्यः
विष्किरः शकुनौ वा एतद्विष्किरः वा वचनेनैव सुट् विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा

सि॰ कौ॰ ११८

124

भूदितिवृत्तिःतत्त्वभाष्यविरोधात् प्रतिष्कशश्चकशेः कशेःप्रतिकशोम्यः पद्यपिकशेरेवकस्मात्तथापिकशेरितिथा
तोर्ग्रहणम् उपसर्गस्य प्रतेर्ग्रहणार्थं तेन यातं तनरोपसर्गान्त प्रस्कण्वहरिश्चन्द्रावृषी हरिश्चन्द्रग्रहणमसमंत्रार्थम्
ऋषीतिकिम् प्रकण्वोदेशः हरिचंद्रोमाणवकः मस्करमस्करिणौ वेणुपरिव्राजकयोः मकरस्य ह्रोश्चुत्वन्नत्वस्य
सुडिति निपात्यते वेणाविति किम् मकरोग्राहः मकरी समुद्रः कास्तीराजस्तुन्दे नगरे अश्वतीरमस्येति कास्तीरं नाम
नगरम् अजस्येव तुन्दमस्येत्यजस्तुन्दं नाम नगरे इति किम् कातीरम् अजतुन्दम् अजतुन्दम् कारस्करो वृक्षः कारं
करोतीति कारस्करो वृक्षः अन्यः कारकरः केचित्तु कस्कादिष्विदं पठन्ति न सूत्रेषु पारस्करप्रभृतीनि च संज्ञायाम् एता
नि ससुट्कानि निपात्यन्ते पारस्करः किष्किंधा तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्चनात्स्वंच
तेन दकारोऽपि वाच्यः तद्बृहतोरीकारतकारौ लुप्येते करपत्योस्तु सुट् चौरदेवतयोरिति समुदायोपाधिः तस्क

११८

रः बृहस्पतिः ऽप्रायस्यचित्तिचित्तयोः प्रायश्चित्तिः प्रायश्चित्तम् वनस्पतिरित्यादि आकृतिगणोयम् इति समासाश्र
यविधयः समर्थानां प्रथमाद्वा इदं पदत्रयमपि क्रियते प्राग्दिश इति यावत् सामर्थ्यं परिनिष्ठितत्वम् कृतसंधि
कार्यत्वमिति यावत् प्राग्दीव्यतोण् तेन दीव्यतीत्यतः प्रागणधिक्रियते अश्वपत्यादिभ्यश्च एभ्योण् स्यात् प्राग्दी
व्यतीयेष्वर्थेषु वक्ष्यमाणस्य ण्यस्यापवादः तद्धितेष्वचामादेः ञिति णिति च तद्धिते परे अचामादेरचो वृद्धिः स्यात्
किति च किति तद्धिते च तथा अश्वपतेरपत्यादि आश्वपतम् गाणपतम् गाणपतो मंत्र इति प्रामादिकमेव दित्यदि
त्यादित्यपत्युत्तरपदाण्ण्यः दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् अणोपवादः दैत्यः अदितेरादित्यस्य
वा आदित्यः प्राजापत्यः यमाच्चेति काशिकायाम् याम्यः पृथिव्या ञाञौ पार्थिवा पार्थिवी देवाद्यञञौ दैव्यम् दैवम् बहि
षष्टिलोपो यञ्च बाह्यः ईकक्च वाहीकः स्यान्नोऽकारः अश्वत्थामः पृषोदरादित्वात्सस्यतः भवार्थेनलग्वा

सि॰ कौ॰
१२७
125

भ्यः अश्वत्थामा लोम्नोपत्येषु बहुष्वकारो वक्तव्यः बाह्वादीञोपवादः उडुलोमाः उडुलोमान् बहुषु किम् औडुलोमिः गो
रजादिप्रसंगे यत् गव्यम् गोभ्यो हेतुभ्य आगतं गोरूप्यम् गोमयम् उत्सादिभ्योञ् औत्सः अग्निकलिभ्यां ढग्वक्तव्यः
अग्नेरपत्यादि आग्नेयम् कालेयम् इत्यपत्यादिविकारांतार्थसाधारणाः प्रत्ययाः स्त्रीपुंसाभ्यां नञ्स्नञौ भवना
त् धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः स्त्रैणः पौंस्नः वत्यर्थे न स्त्रीपुंवच्चेति ज्ञापकात्
स्त्रीवत् पुंवत् द्विगोर्लुगनपत्ये द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक् स्यात् पंचसु क
पालेषु संस्कृतः पुरोडाशः पंचकपालः द्विगुनिमित्तस्येति किम् पंचकपालस्येदं खंडं पांचकपालम् अजादिषु
किम् पंचगर्गरूप्यम् अनपत्ये किम् द्वयोर्मित्रयोरपत्यं द्वैमित्रिः गोत्रेलुगचि अजादौ प्राग्दीव्यतीये विवक्षि
ते गोत्रप्रत्ययस्य लुङ्न स्यात् गार्गीयणं छात्राः वृद्धाच्छः आपत्यस्य च तद्धितेनाति हलः परस्यापत्ययकारस्य लो

११८

यः स्यात् तद्धिते परे न त्वाकारेण गार्गीयाः गार्गीव्यतः किम् गर्गेभ्यो हितम् गर्गीयम् अचि किम् गर्गेभ्य आगतं गर्ग
रूप्यम् इति नि लुक् गार्गीव्यतीये अजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुक् स्यात् ग्लुचुकस्य गोत्रापत्यं
ग्लुचुकायनिः वक्ष्यमाणः फिञ् ततो यून्यण् ग्लौचुकायनः तस्य छात्रा अपि ग्लौचुकायनाः अणो लुकि
वृद्धत्वाभावाच्छो न पैलादिभ्यश्च एभ्यो युवप्रत्ययस्य लुक् पीलाया वेत्यण् तस्मादणो द्व्यचः इति फिञ् तत
स्य लुक् पैलः पिता पुत्रश्च नद्राजाच्चणः इञन्तमणन्तं तादंगशाह्वास्मो द्व्यच इति फिञो लुक् आंगः पि
ता पुत्रश्च इञः प्राचाम् गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेद्गोत्रं प्राचां भवति पन्नागारस्यापत्यं अत इञ्
यत्रिञोश्चेति फक् पान्नागारिः पिता पुत्रश्च प्राचां किम् दाक्षिः पिता दाक्षायणः पुत्रः न तौल्वलिभ्यः तौल्वल्यादिभ्यः पर
स्य युवप्रत्ययस्य लुङ्न स्यात् पूर्वेण प्राप्तः तुल्वलः ततः इञ् फक् तौल्वलिः पिता तौल्वलायनः पुत्रः फाण्टाहृतेरन्यतरस्या

सि॰कौ॰
११८
126

म् वृद्धिनिमित्तस्येति किम् प्राग्देशे विकल्पार्थं सूत्रम् कात्यायनस्य छात्राः कातीयाः कात्यायनीयाः यस्कस्यापत्यं यास्कः
शिवाद्यण् तस्यापत्यं युवा यास्कायनिः अणो द्व्यचः इति फिञ् तस्य छात्राः यास्कीयाः यास्कायनीयाः तस्यापत्यं ष
ष्ठ्यन्तात्कृतसंधेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः उपगोरपत्यमौपगवः आदिवृद्धिरंतोपधावृ
द्धिं बाधते तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् उत्सर्गः शेषएवासौ वृद्धान्यस्य प्रयोजनम् भानोरपत्यं भान
वः कृतसंधेः किम् सौत्थितिः अकृतव्यूहपरिभाषया सावुत्थितिति प्राप्तम् समर्थपरिभाषयानेह वस्त्रमुपगो
रपत्यं चैत्रस्य मा भूत् किम् अपत्यवाचकात् षष्ठ्यर्थमा भूत् वाग्रहणाद्वाक्यमपि दैवयज्ञीत्यादिसूत्रादन्यतरस्यां
ग्रहणानुवृत्तेः समासोऽपि उपग्वपत्यं जातित्वात् ङीष् औपगवी आश्वपतः दैत्यः औत्सः स्त्रैणः पौंस्नः अपत्यं पौत्र
प्रभृति गोत्रम् अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् जीवति तु वंश्ये युवा वंश्ये पित्रादौ जीवति पौत्रादेर्य ११८

दपत्यंचतुर्थादितद्युवसंज्ञमेवस्यान्नतुगोत्रसंज्ञम्‌ भ्रातरिचज्यायसि ज्येष्ठेभ्रातरिजीवतिकनीयान्‌ चतुर्थादिर्युवा
स्यात्‌वाऽन्यस्मिन्सपिंडेस्थविरतरेजीवति भ्रातरन्यस्मिन्सपिंडेस्थविरतरेजीवतिपौत्रप्रभृतेरपत्यंजीवदेवयुवसं
ज्ञम्‌ एवंजीवतिग्रहणमपत्यस्यविशेषणम्‌ द्वितीयेसपिंडस्तरम्निर्देशाउभयकृतकार्थः स्थानेनवयसाचोत्कृ
ष्टेनपितृव्येमातामहेभ्रातरिवाजीवतिगार्ग्यस्यापत्यंगार्ग्यायणः गार्ग्योवास्थवीतिकिम्‌ स्थानवयोन्यूनेगार्ग्यप
वज्जीवतिकिम्‌ मृतेमृतोवागार्ग्यएव वृद्धस्यचपूजायामितिवाच्यम्‌ गोत्रस्यैववृद्धसंज्ञाप्राचाम्‌ गोत्रस्यैववृद्ध
संज्ञाप्राचाम्‌ गोत्रस्ययुवसंज्ञायांगम्यमानायाम्‌ तत्रभवान्‌ गार्ग्यायणः पूजेतिकिम्‌ गार्ग्यः यूनश्चकुत्साया
म्‌ गोत्रसंज्ञेतिवाच्यम्‌ गार्ग्योजाल्मः कुत्सेतिकिम्‌ गार्ग्यायणः एकोगोत्रे गोत्रएकएवापत्यप्रत्ययः स्यात्‌ उपगोर्गो
त्रापत्यमौपगवः गार्ग्यः नाडायनः गोत्रस्यैकोनसंख्यानांप्रत्यायानांपरेपरायद्वास्यद्यूनसंख्येभ्योनिष्ठोत्पत्तिः

सि॰ कौ॰
११९
127

प्रसज्यते १ अपत्यं पितुरेव स्यात्ततः प्राचामपीति च मतभेदेन तद्व्याख्यैः सूत्रमेतत्प्रत्योत्तरम् २ पितुरेवापत्यमिति
पक्षे हि उपगोस्तृतीये वाच्ये औपगव्यादिः स्यात् चतुर्थे तु जीवज्येष्ठभ्रातृवंश्ये औपगवे फक् स्यात् फक्फिञोः प
रप्रत्ययासम्भवात् तन्मते गोत्रे एको न शतं प्रत्ययाः स्युः पितामहादीनामपीतिपक्षे तु तृतीये वाच्ये उपगोरणा
इष्टे सिद्धेऽपि अणो नादिञपि स्यात् चतुर्थे ततः फगिति फक्फिञोः परं परायोभ्रातन्मते गोत्रेऽप्यनवधिरनिष्टप्रत्य
याः स्युः अतो नियमार्थमिदं सूत्रम् एवमनन्तरसूत्रेऽप्यूह्यं गोत्राद्यून्यस्त्रियाम् ४।१।९४ यून्यपत्ये गोत्रप्रत्ययान्तादेव
प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा गार्ग्यस्यापत्यं गार्ग्यायणः स्त्रियां गोत्रत्वादेक एव प्रत्ययः अत इञ् अदन्तं
यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ्स्यादपत्येऽर्थे दाक्षिः बाह्वादिभ्यश्च बाहविः औडुलोमिः आकृति
गणोऽयम् सुधातुरकङ् च सुधातुरपत्यं सौधातकिः व्यासवरुडनिषादचण्डालबिम्बानां चेति वक्त ११९

यम्‌ नवाभ्यांपदांताभ्यांपूर्वौतुताभ्यामैच्‌ पदांताभ्यांयकारवकाराभ्यांपरस्याचोनवृद्धिः किंतुताभ्यांपूर्वौक्र
मादैचागमौस्तः वैयासकिः वाहडकिः गोत्रेकुंजादिभ्यश्च्फञ्‌ व्रातच्फञोरस्त्रियं व्रातवाचिभ्यश्च्फञंते
तेभ्यश्चस्वार्थेञ्यः स्यान्नतुस्त्रियांकौंजायन्यः बहुत्वेतद्राजाञ्ञाणोतिलुग्वक्ष्यते वाभ्रायन्यः स्त्रियांकौंजा
यनी गोत्रत्वेनजातित्वान्ङीष्‌ अनंतरापत्येकौंजिः नडादिभ्यः फक्‌ गोत्रइत्येवनाडायनः चाराय
णः अनंतरो नाडिः हरितादिभ्योञः यञ्भ्योऽञंतेभ्यश्च्‌ निपक्‌ हारितायनः इहगोत्राधिकारेपिसाम
र्थ्यादनंतरम्‌ नहिगोत्रादपरगोत्रप्रत्ययः विदाद्यंतर्गणोहरितादिः यञिञोश्चगोत्रे यौयञिञौतदं गौ३
तात्फक्स्यात्‌ अनातीत्युक्तेरापत्यस्येतियलोपोनगार्ग्यायणः दाक्षायणः शारद्वच्छुनकदर्भाद्भृगुव
साग्रायणेषु गोत्रेफक्‌ अञिञोरपवादः आद्योविदादौशारद्वतायनो भार्गवश्चेत्‌शारद्वतोन्यः शौ

सि॰ कौ॰
१२
128

नकायनो वात्स्यश्चेत् शौनकोऽन्यः दार्भायणः आग्रायणश्चेत् दार्भिरन्यः द्रोणपर्वतजीवंतादन्यतरस्यां ए
भ्यो गोत्रे फक्वा द्रौणायनः द्रौणिः पार्वतायनः पार्वतिः जैवंतायनः जैवंतिः अत्रादिविहद्रोणः अश्वत्था
म्नेनेतरेतरप्रचारात् अनृष्यानंतर्ये विदादिभ्योऽञ् एभ्यो गोत्रे ये त्वत्रानृषयस्तेभ्य आनंतर्ये स्र त्रैला
र्थेऽञ् विदस्य गोत्रं वैदः अनंतरो वैदिः बाह्वादिराकृतिगणत्वादिञ् पुत्रस्यापत्यं पौत्रः दौहित्रः गर्गा
दिभ्यो यञ् गोत्र इत्येव गार्ग्यः वात्स्यः यञञोश्च गोत्रे यद्यञंतमञंतं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृ १
ते बहुत्वे न तु स्त्रियाम् गर्गाः वत्साः विदाः उर्वाः तत्कृते किम् प्रियगार्ग्याः स्त्रियां तु गार्ग्यः स्त्रियः गोत्रे कि
म् द्वैप्याः औत्साः प्रवराध्याय प्रसिद्धमिह गोत्रम् तेनेह न पौत्राः दौहित्राः मधुबभ्र्वोर्ब्राह्मणकौशिक
योः गोत्रे यञ् माधव्यो ब्राह्मणः माधवोऽन्यः बाभ्रव्यः कौशिकः बाभ्रवोऽन्यः बभ्रुशब्दस्य गर्गादिपाठा १२

त्मिदेनियमार्थमिदम् गर्गादिपाठफलं तु लोहितादिकार्यम् वाभ्रव्यायणी कपिवोधादांगिरसे गोत्रेय
ञ्स्यात् काप्यः वौध्यः आंगिरसे किम् कापेयः वौधिः वतंडाच्च आंगिरसे वातंड्यः अनांगिरसे तु ग
र्गादौ शिवादौ पाठाद्यञणौ वातंड्यः वातंडः लुक् स्त्रियाम् वतंडाच्चेति विहितस्य लुक् स्यात् स्त्रियाम्
शार्ङ्गरवादित्वान्ङीन् वतंडी अनांगिरसे तु वातंड्यायनी लोहितादित्वात्ष्फः अणि तु वातंडी ऋषिका
ह्वयमाणः ष्फङ् न अश्वादिभ्यस्फञ् गोत्रे आश्वायनः पुंसि जाते पुंसीति प्रकृतिविशेषणं जातस्य गो
त्रे जातायनः पुंसीति किम् जाताया अपत्यं जातेयः भर्गात्त्रैगर्ते गोत्रे फञ् भार्गायणस्त्रैगर्तः भार्गिरन्यः
शिवादिभ्योऽण् गोत्र इति निवृत्तं शिवस्यापत्यं शैवः गांगः पक्षे तिकादित्वात्फिञ् गांगायनिः शुभ्रादि
त्वात् ढक् गांगेयः अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः अवृद्धाभ्यो नदीमानुषीनामभ्यो

सि॰ कौ॰ ग्रहणात् ढकोऽपवादः यामुनः नार्मदः वितिनाया वैतिनः अवृद्धाभ्यः किम् वासवदत्तेयः नदीमानादि
१२। किम् वैनतेयः तन्मामिकाभ्यः किं शोभनाया अपत्यं शौभनेयः ऋष्यंधकवृष्णिकुरुभ्यश्च ऋषयो मंत्रद्रष्टारः
129 वासिष्ठः वैश्वामित्रः अंधकेभ्यः श्वाफल्कः वृष्णिभ्यः वासुदेवः आनिरुद्धः शौरिरिति तु बाह्वादित्वात् कुरुभ्यः
नाकुलः साहदेवः इञ एवायमपवादो मध्येऽपवादन्यायात् अत्रिशब्दात्तु परत्वाड्ढगेव आत्रेयः मातुरुत्संख्यासंभद्रपू
र्वायाः संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण्प्रत्ययश्च द्वैमातुरः सांमातुरः भाद्रमातुरः आदेशार्थं वच
नं प्रत्यय उत्सर्गेणैव सिद्धः स्त्रीलिंगनिर्देशाद्धान्यपेत्तुः तेन धान्यमातुर्न संख्येति किम् सौमात्रः शुभ्रादित्वाद्द्वैमात्रे
यः कन्यायाः कनीन च ढकोऽपवादोऽण् तत्संनियोगेन कनीनादेशश्च कानीनो व्यासः कर्णश्च अनूढाया एवा
पत्यमित्यर्थः विकर्णशुंगच्छगलाद्वत्सभरद्वाजात्रिषु अपत्येऽण् वैकर्णो वात्स्यः वैकर्णिरन्यः शौंगो भारद्वा १२

जः शौंगेरन्यः काशालग्राद्वेयः काशालिरन्यः केचित्तु भंगेत्येवं तं पठंति तेषां ढक् प्रत्युदाहरणं शौंगेयः पीला
यावा तन्नामिकाणं बाधित्वा द्व्यचश्चेति ढकि प्राप्ते पक्षे अण् विधीयते पीलाया अपत्यं पैलेयः ढक्च मंडूकात् चाद
ण् पक्षे इञ् मांडूकेयः मांडूकः मांडूकिः स्त्रीभ्यो ढक् स्त्रीप्रत्ययांतेभ्यो ढक्स्यात् वैनतेयः बाह्वादित्वात्सौमि
त्रिः शिवादित्वात्तापतः द्व्यचः द्व्यचः स्त्रीप्रत्ययांतेभ्योऽपत्ये ढक्स्यात् तन्नामिकाणोपवादः दात्तेयः पार्थेइत
रत्तनस्येदमित्यण् इतश्चानिञः इकारांताद्व्यचोपत्ये ढक्स्यान्नत्विजंतात् दौलेयः नैधेयः शुभ्रादिभ्यश्च ढक्
शुभ्रस्यापत्यं शौभ्रेयः विकर्णकुषीतकात्काश्यपे अपत्ये ढक् वैकर्णेयः अन्यो वैकर्णिः कौषीतकिः भ्रुवो
वुकच ढक् भ्रौवेयः प्रवाहणस्य ढे प्रवाहणशब्दस्योत्तरपदस्याचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे प्र
वाहणेयः प्रावाहणेयः तत्प्रत्ययस्य च ढांतस्य प्रवाहणशब्दस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा प्र

सि॰कौ॰ वाहणेयस्यापत्यंप्रावाहणेयिः प्रवाहणेयिः वास्यतद्धितनिमित्तवृद्धिः तच्चयेणविकल्पेनवाधितुंनशक्यते
१२२ इतिसूत्रारंभः कल्याण्यादीनामिनङ् एषामिनङादेशः स्यात्ढक्च काल्याणिनेयः बांधकिनेयः कुलटा
130 याचा इनङ्मात्रंविकल्पतेढकत्तुनित्यः पूर्वेणैव कौलटेयः कौलटिनेयः सतीभिक्षुकात्रकुलटाः यातुव्य
भिचारार्थंकुलान्यटतितस्यास्तुक्षुद्राभ्योवेतिपक्षेढ्रक् कौलटेरः हृद्भगसिंध्वंतेपूर्वपदस्यच हृदाद्यंतेपूर्वो
त्तरपदयोरचामादेरचोवृद्धिर्णितिकितिच सुहृदोऽपत्यंसौहार्दः सुभगायाअपत्यंसौभागिनेयः सक्तुप्र
धानाः सिंधवः सक्तुसिंधवः तेषुभवः साक्तुसैंधवः चटकायाऐरक चटकस्येतिवाच्यम् लिंगविशिष्टप
रिभाषयास्त्रियाअपिचटकस्यचटकायावाअपत्यंचाटकैरः स्त्रियामपत्येलुगैरकश्चः तयोरेवअपत्यंच
काश्रुजादिताङ्गृ गोधायाढ्रक् गौधेरः शुभ्रादित्वात्पक्षेढक् गौधेयः आरगुदीचाम् गौधारः ढ्रकाभिदे
१२२

आकारो द्वारणामन्यतो विधानार्थं जडस्यापत्यं जाडारः पेडस्यापत्यं पैडारः क्षुद्राभ्यो वा अंगहीनाः शीलहीनाश्च
क्षुद्रास्ताभ्यो वा ढ्रक् काणेरः काणेयः दासेरः दासेयः पितृष्वसुश्छण् अणोपवादः पैतृष्वस्रीयः ढकि लोपः पि
तृष्वसुरंतलोपः स्याड्ढकि अनण्वढक् पैतृष्वसेयः मातृष्वसुश्च पितृष्वसुर्यदुक्तं तदस्यापि स्यात् मातृष्वस्रीयः
मातृष्वसेयः चतुष्पाद्भ्यो ढञ् ढे लोपोऽकद्र्वाः कद्रूभिन्नस्योवर्णान्तस्य लोपः स्यात् ढे परे कामण्डलेयः कमण्डलुश
ब्दश्चतुष्पाज्जातिविशेषे गृष्ट्यादिभ्यश्च एभ्यो ढञ् स्यात् अणो ढकोरपवादः गार्ष्टेयः मित्रयोरपत्यं ऋष्यणि प्राप्ते ढञ्
केकयमित्रयुप्रलयानां यादेरियः एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे इति इयादेशे प्राप्ते दा
डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि एता
नि यात्यंते इति यलोपः मैत्रेयः मैत्रेयौ यस्कादिभ्यो गोत्रे एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियामि

सि॰
कौ॰
१२३
[3]

यवः अत्रिभृगुकुत्सवशिष्ठगोतमांगिरोभ्यश्च एभ्यो गोत्रप्रत्ययस्य लुक् स्यात्तत्कृते बहुत्वे च। त्रयः भृगवः कुत्साः
वसिष्ठाः गोतमाः अंगिरसः बह्वचः प्राच्यभरतेषु बह्वचः परो यः इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लु
क् स्यात् पन्नागाराः युधिष्ठिराः नगोपवनादिभ्यः एभ्यो गोत्रप्रत्ययस्य लुक् न स्यात् विदाद्यंतर्गणोपवनाः शैग्रवाः ति
ककितवादिभ्यो द्वंद्वे एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्यात् द्वंद्वे तैकायनश्च कैतवायनश्च तिकादिभ्यः फिञ् तस्य लुक्
तिककितवाः उपकादिभ्योन्यतरस्यामद्वंद्वे एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् वा स्यात् द्वंद्वे चाद्वंद्वे च उपकाः औपकाः
आष्टककपिष्ठलाः आष्टकिकापिष्ठलयः लमकाः लामकायनाः आगस्त्यकौंडिन्ययोरगस्तिकुंडिनच् एतयोरवय
वस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक् स्यात् अविशिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्तिकुंडिनच् एतावादेशौ
स्तः अगस्तयः कुंडिनाः राजश्वशुराद्यत् राज्ञो जातावेवेति वाच्यम् ये चाभावकर्मणोः पादौ तद्धिते परे ऽन् प्रकृत्या स्या

न्नत्भावकर्मणोः राजन्यः सममुर्यः जातिग्रहणाच्छब्दादेवमन्यो राजनः अन् अणि अन् प्रकृत्या स्यादिति
टिलोपो न अभावकर्मणोः किम् राज्ञः कर्म भावो वा राज्यम् संयोगादिभ्यश्च इन् प्रकृत्या अणि परे रैविणोऽपत्यं
चाक्रिणः न मपूर्वोऽपत्येऽवर्मणः मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि भाद्रसामः मपूर्वः किम् सौत्वनः अपत्ये
किम् चर्मणा परिवृतो चार्मणो रथः अवर्मणः किम् चक्रवर्मणोऽपत्यं चाक्रवर्मणः वा हितनाम्न इति वा अम
हितनाम्नोऽपत्यं हैतनामनः हैतनामः ब्राह्मोऽजातौ योगविभागोऽत्र कर्तव्यः ब्राह्म इति निपात्यतेऽनपत्येऽणि
ब्राह्मं हविः ततोऽजातौ अपत्ये जातावणि ब्रह्मणः टिलोपो न स्यात् ब्रह्मणोऽपत्यं ब्राह्मणः अपत्ये किम् ब्राह्मी
औषधिः औक्षमनपत्ये अणि टिलोपो निपात्यते औक्षं पदम् अनपत्ये किम् उक्ष्णोऽपत्यम् औक्ष्णः षपूर्वह
न्धृतराज्ञामणि षपूर्वो यो न् तस्य हन्तादेश्च भस्यातो लोपोऽणि ताक्ष्णः औष्णः धृतराज्ञोऽपत्यं धार्तराज्ञः षेति

किमस्यामनः अणि किमताच्छयः तत्राहुः क्षत्रियः जाताविमेवचनात्रिरन्यः कुलात्खः कुलीनः तदंतादपिउ
त्तरसूत्रे ऽपूर्वपदादितिलिंगात् आढ्यकुलीनः अपूर्वपदादन्यतरस्यां यड्ढकञौ कुलादिसेवपदेखः कुल्यः कौ
लेयकः कुलीनः पदग्रहणं किम् बहुकुल्यः बाहुलेयकः बहुकुलीनः महाकुलादञ्खञौ अन्यतरस्यामि
त्यनुवर्त्ततेपक्षेखः माहाकुलः माहाकुलीनः दुःकुलाड्ढक् पूर्ववत्पक्षेखः दौष्कुलेयः दुष्कुलीनः स्वसुश्छः
स्वस्रीयः भ्रातुर्व्यच्च चाच्छः अणोपवादः भ्रातृव्यः भ्रात्रीयः व्यन्सपत्ने भ्रातुर्व्यन्स्यात्पर्यायेप्रकृतिप्रत्ययसमु
दायेन शत्रौवाच्ये भ्रातृव्यः शत्रुः पाप्मना भ्रातृव्येणेति तु पचारज रेवत्यादिभ्यष्ठक् ठस्येकः अंगात्परस्यठस्य
इकादेशः स्यात् रैवतिकः गोत्रस्त्रियाः कुत्सने णच गोत्रेया स्त्रीतद्वाचकाच्छष्ठाणठकौ स्तः कुत्सायां सामर्थ्यात्
युनि यागर्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः पुंवद्भावाद्ह्रस्वात्प्राग्दणठकौ यस्येतिलोपः आपत्यस्येतियलोपः

वृद्धाट्ठक् सौवीरेषु बहुलम् सुवीरदेशोद्भवाः सौवीराः वृद्धात्सौवीरगोत्राद्यूनि बहुलं ठक् स्यात्कुत्सायाम् भा
गवित्तेरपत्यं भागवित्तिकः पक्षे यक् भागवित्तायनः फेश्छ च फिञन्तात्सौवीरगोत्रादपत्ये छः स्याट्ठक् च कुत्सनेण
मेयमुंदस्यापत्यं यामुंदायनिः तिकादित्वात्फिञ् तस्यापत्यं यामुंदायनीयः यामुंदायनिकः कुत्सने किम् या
मुंदायनिः औत्सर्गिकस्याण एव दत्तविषये तिलुक् सौवीरेषु किम् नैकायनिः फांटाहृतिमिमताभ्यां णफिञौ
सौवीरेषु नेह यथासंख्यम् अल्पाच्तरस्य परनिपातात्लिंगादिति वृत्तिः भाष्ये तु यथासंख्यमेव स्थितम् फां
टाहृतः फांटाहृतायनिः मैमितः मैमितायनिः कुर्वादिभ्यो ण्यः अपत्ये कौरव्याः ब्राह्मणाः वावदूकाः सैम्रा
जः क्षत्रियो सम्राजः सांम्राजोन्यः सेनांतलक्षणकारिभ्यश्च एभ्यो ण्यः हारिषेण्यः लाक्षण्यः कारिशिल्पी
तस्मात् तांतुवाय्यः कौंभकार्यः नापित्यः उदीचामिञ् हारिषेणिः लाक्षणिः तांतुवायिः कौंभकारिः नापि

सि॰
कौ॰
१२५
133

तान्तपरत्वात्किं नैवनायितायनिः तदणोऽग्रा उपसंख्यानं तादग्राः यैद्वैतादग्रायणः तिकादिभ्यः फिञ् तैकाय
निः कौशल्यकार्मार्याभ्यां च अपत्ये फिञ् इञोऽपवादः परमप्रकृतेरेवायमिष्यते प्रत्ययसंयोगेन प्रकृतिस्वरू
पं निपात्यते कुशलस्यापत्यं कौशल्यायनिः कर्मारस्यापत्यं कार्मार्यायणिः छागवृषयोरपि छागायनिः वा
र्ष्यायणिः अणो द्व्यचः अपत्ये फिञ् इञोऽपवादः कार्त्रायणिः अण इति किम् दाक्षायणः द्व्यचः किम् औ
पगविः त्यदादीनां वा फिञ् वाच्यः त्यादायनिः त्यादः उदीचां वृद्धादगोत्रात् आम्रगुप्तायनिः प्राचां तु आम्र
गुप्तिः वृद्धात्किम् दाक्षिः अगोत्रात्किम् औपगविः वाकिनादीनां कुक् च अपत्ये फिञ् वा वाकिनस्यापत्यं वाकिन-
कायनिः पुत्रान्तादन्यतरस्याम् अस्माद्वा फिञि वृद्धः तस्मिन्परे पुत्रान्तस्य वा कुक् विधीयते गार्गीपुत्रकायणिः
गार्गीपुत्रायणिः गार्गीपुत्रिः प्राचामवृद्धात्फिन्बहुलम् ग्लुचुकायनिः मनोर्जातावञ्यतौ षुक् च समुदायार्थो जा

त्तिः मानुषः मनुष्यः जनपदशब्दात्क्षत्रियादञ् जनपदक्षत्रिययोर्वाचकादञ्स्यादपत्ये दोड्डिनायनेतिसूत्रेनियातादि
लोपः ऐक्ष्वाकः ऐक्ष्वाकौ क्षत्रियसमानशब्दाज्जनपदात्तस्यराजन्यपत्यवत् तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसं
ज्ञासामर्थ्यात् पंचालानांराजापांचालः पूरोरप्येवक्तव्यः पौरवः पांडोर्ड्यण् पांड्यः साल्वेयगांधारिभ्यांच आभ्याम त्रे
ञ्वृद्धेदितिप्राप्तञ्योऽपवादः साल्वेयः गांधारः तस्यराजन्यप्येवं द्व्यञ्मगधकलिंगसूरमसादण् अञोऽपवादः द्व्यच्
आंगः वांगः सौह्मः मागधः कालिंगः सौरमसः तस्यराजन्यप्येवं वृद्धेत्कोसलाजादाञ्ञ्यङ् वृद्धात् आंबष्ठ्यः सौवीर्यः
इत्त आवंत्यः कौसल्यः अजादस्यापत्यमाजाद्यः कुरुनादिभ्योण्यः कौरव्यः नैषध्यः सनैषधस्यार्थपतेरित्यादौतुशे
षिकोण् साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् साल्वोजनपदस्तदवयवाउदुंबरादयः तेभ्यः प्रत्यग्रथादिभ्य
श्चिभ्यश्चइञ्स्यादञोऽपवादः औदुंबरिः प्रात्यग्रथिः कौलकूटिः आश्मकिः राजन्यप्येवम् तेतद्राजाः अजादयएत

त्संता॰ सु॰ तद्राजस्य बहुषु तेनैवास्त्रियाम् बहुष्वर्थेषु तद्राजस्य लुक् स्यात् तदर्थकृते बहुत्वे न तु स्त्रियाम् इक्ष्वाक
वः पंचालाः इत्यादि कथं तर्हि कौरव्याः पशवः तस्यामेव रघोः पांड्याः इति कौरव्ये पांड्ये च साधव इति समाधेयम् रघू
णामन्वये वंशे निरुच्यमानाय षड्भिः कथं चिदिति तु रघुपांडुशब्दयोस्तदपत्ये लक्षणया कंबोजाल्लुक् अस्मात्त
द्राजस्य लुक् कंबोजः कंबोजौ कंबोजादिभ्य इति वक्तव्यम् चोलः शकः अम् लक्षणस्याणो लुक् केरलः आ
जो लुक् कंबोजाः समरे इति पाठः सुगमः दीर्घादि पाठे तु कंबोजोऽभिजनो येषामित्यर्थः सिंधुतक्षशिलादिभ्योऽण्
जो इत्यण् स्त्रियामवंतिकुंतिकुरुभ्यः तद्राजस्य लुक् अवंती कुंती कुरूः अतश्च तद्राजस्याकारस्य स्त्रियां लुक् शूरसेनी
मद्री कथं माद्रीसुतावितिह्रस्व एव पाठ इति हरदत्तः भार्गादित्वैकल्यं न प्राच्यभर्गादियौधेयादिभ्यः एभ्यस्तद्राज
स्य न लुक् पांचाली वैदर्भी आंगी वांगी मागधी एते प्राच्याः भार्गी कारूशी केकयी कैकेयी त्यत्र जन्मेजनक भाव ल १२६

त्तणोपुंयोगेङीषगुधामुक्ता ग्राभ्यांष्यच इतिट कृततः स्वार्थे यार्ष्वादिर्यो येयादिभ्यामणाञा वित्यत्र शार्ङ्गरवाद्य

ञइतिङीन् आद्युदात्तं पदं अत एवेतितकिं तढगंततान्ङीमुदात्तनिर्दिष्टेतिस्वरः स्यात् योथेपीशेक्तपी अणिञो

रनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे आदीनामंत्यमुत्तमं तस्य समीपमुपोत्तमम् गोत्रे यावणिञौ विहितावनार्षौ

तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात् निर्दिश्यमानस्यादेशा भवंतीत्यणिञोरेवष

ङ्विति यङश्चाप् कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या वाराह्या अनार्षयोः किम् वासिष्ठी वैश्वामित्री गुरूपो

त्तमयोः किम् औपगवी जातिलक्षणो ङीष् गोत्रे किम् अहिच्छत्रे जाता आहिच्छत्री गोत्रावयवात् गोत्रावयवा

गोत्राभिमताः कुलाख्याः ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात् अगुरूपोत्तमार्थमारंभः

पौणिकाभौणिकाक्रौड्यादिभ्यश्च स्त्रियां ष्यङ् प्रत्ययः स्यात् अगुरूपोत्तमार्थेनाणिञर्थश्चारंभः क्रौड्या

लि॰
कौ॰
१२७

135

उगास्तत्रभवत्यां स्तस्य भोजनस्तत्रिये भोज्यादैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम् एभ्यश्च
तुभ्यः ष्यङ्गोत्रेगोत्रार्थमिदं गोत्रेपि परत्वात्प्रवर्तते पदोऽनो मनुष्येति ङीष् दैवयज्ञ्या दैवयज्ञी इत्यपत्याधिकारः
तेन रक्तं रागात् रज्यतेनेनेति रागः कषायेण रक्तं वस्त्रं काषायम् मांजिष्ठम् रागात्किम् देवदत्तेन रक्तं वस्त्रं ला
क्षारोचनाट्ठक् लाक्षिकः रौचनिकः शाकलकर्दमाभ्यामुपसंख्यानम् शाकलिकः कार्दमिकः आभ्यामण्
पीतिवृत्तिकारः शाकलः कार्दमः नील्याअन् नील्यानक्तम् नीलम् पीतात्कन् पीतकम् हरिद्रामहारज
नाभ्यामञ् हारिद्रम् माहारजनम् नक्षत्रेण युक्तः कालः पुष्येण युक्तं पौषमहः पौषी रात्रिः लवविशेषे पूर्वे
णविहितस्य लुप्स्यात् षष्ठिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते अद्य पुष्यः कथं तर्हि पुष्ययुक्ता पौ रात्रि
र्णमासी पौषीति विभाषा फाल्गुनी श्रवणा कार्तिकी चैत्रीभ्यः इति निर्देशेन पौर्णमास्यामयं लुबिति तत्त्वात्

१२७

श्रवणाषाढ्यात् अतएव लमूपुकवद्भावाभावश्च अश्रवाय काम्यपिनिपातननानि श्रावणीसंज्ञायां श्रवणाश्वत्या
भ्यां विशेषार्थोयमारंभः श्रवणरात्रिः अश्वत्यो मुहूर्तः संज्ञायां किम् श्रावणी आश्वत्थी इदं दाक्षुः न दत्र
इंदाक्षुके कालेछः स्याद्विशेषसत्यस्तिच तिष्यपुनर्वसवीय महः राध्यानुराधीया रात्रिः दृष्टंसाम तेनेनेव
वशिष्ठेनदृष्टं वाशिष्टंसाम अस्मिन्नर्थे ऽण् डिद्वा वक्तव्यः उशनसा दृष्टं औशनं औशनसम् कलेटक् कलि-
ना दृष्टं कालेयं साम सर्वत्राग्निकलिभ्यां ढक्वक्तव्यः अग्निना दृष्टं तत्र भवं तत आगतं तस्य स्वमिदं वा आग्नेयम् वा
मदेवाड्ड्यो वामदेवेन दृष्टं साम वामदेव्यम् सिद्धयस्येति लोपेन किं मर्थं ययतो डित्तैयग्रहणं मातदर्थं अजवा
मदेव्यस्यन जस्वरे परिवृत्तो रथः वस्त्रैः परिवृत्तो वास्त्रो रथः नच्च किं मूवस्त्रेण परिवृत्तः कायः समंतात् वेष्टितः
परिवृत उच्यते तेने हनच्छात्रैः परिवृत्तो रथः पांडुकंबलादिनिः पांडुकंबलेन परिवृत्तः पांडुकंबली पांडु

सि॰
कौ॰
१२८
136

केवलशब्दोराज्ञामन्तरणाकेवलस्यवाचकस्यमतत्वर्थीयेनैवसिद्धेवचनमणोनिवृत्त्यर्थं दैयवैयाघ्रादञ् द्वीपि
नोविकारोद्वैयंतेनपरिवृतोद्वैयारथः एवंवैयाघ्रः कौमारपूर्ववचने कौमारेत्यविभक्तिकोनिर्देशः अपूर्व
त्वेनिपातनमिदं अपूर्वपतिंकुमारीउपपन्नः कौमारःपतिः यद्वा अपूर्वपतिः कुमारीपतिमुपपन्नाकौमा
रीभार्यातत्रोद्धृतममत्रेभ्यः शरावेउद्धृतः शारावओदनः उद्धरतिरिहोद्धरणपूर्वकेनिधानेवर्त्ततेतेनससी
उद्धृत्यनिहितइत्यर्थः स्थंडिलाच्छयितरिव्रते तत्रेत्येवसमुदायेनचेद्व्रतंगम्यते स्थंडिलेशयितेनियमोस्य
स्थांडिलः भिक्षुः संस्कृतंभक्षाः सप्तम्यंतादण्स्यात्संस्कृतेर्थे यत्संस्कृतंभक्ष्याश्चेत्तेस्युः भ्राष्ट्रेसंस्कृताभ्राष्ट्राः
अष्टसुकपालेषुसंस्कृतोष्टाकपालःपुरोडाशः शूलोखाद्यत् अणोपवादः शूलेसंस्कृतंशूल्यंमांसंउखापात्र
विशेषः तस्यांसंस्कृतमुख्यम् दध्नष्ठक् दधिसंस्कृतंदाधिकम् उदश्वितोन्यतरस्याम् ठक्स्यात्पक्षेण् उदश्वित्कं १२८

तान्तः इसुसुक्तान्तात्कः इसुसुक्तान्तादंगात्परस्य ठस्य कं स्यात् उदकेन श्वयति वर्द्धते इत्युदश्वित् तत्र संस्कृतं औद
श्वित्कः औदश्वितः इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह आशिषा चरति आशिषिकः उषा चरति औषिकं
दोषउपसंख्यानम् दोर्भ्यां तरति दोष्कः तीरादृन् अत्र संस्कृतमित्येव संबध्यते न तु भक्ष्या इति तेनपवाग्वा
मपि भवति दैरे पौ सास्मिन्पौर्णमासीति इति प्रथमान्तेन्तायामपि लभ्यते पौषी पौर्णमास्यस्मिन्पौषो मा
सः आग्रहायण्यश्वत्थाट्ठक् अग्रेहायनस्याद् आग्रहायणी प्रज्ञादेराकृतिगणत्वादण् पूर्वपदात्संज्ञाया
मिति णत्वम् आग्रहायणी पौर्णमासी अस्मिन्नाग्रहायणिको मासः अश्वत्थेन युक्ता पौर्णमासी अश्व
त्थानियात्तस्यां पौर्णमास्यामपि लप आश्वत्थिकः विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः एभ्यष्ठ
ग्वा पक्षे ण फाल्गुनिकः फाल्गुनो मासः श्रावणिकः श्रावणः कार्त्तिकिकः कार्त्तिकः चैत्रिकः चैत्रः मास

सि॰ कौ॰ १२९ 137

देवताः इंद्रो देवता अस्य ऐंद्रं हविः पाशुपतम् बार्हस्पत्यं त्यजमानद्रव्ये उद्देश्यविशेषो देवता मंत्रस्तुत्या च ऐं

द्रो मंत्रः आग्नेयो वै ब्राह्मणो देवतयेति तु शैषिकेर्थे सर्वत्राग्नीतिठक् कस्येत् कशब्दस्य इकारादेशः स्या

त्प्रत्ययसंनियोगेन अस्येति लोपात्परत्वादादिवृद्धिः को ब्रह्मा देवतास्य कायं हविः श्रीर्देवतास्य श्रायम्

शुक्राद्घन् शुक्रियम् अपोनप्त्रपांनप्तृभ्यां घः अपोनप्त्रियम् अपांनप्त्रियम् अपोनपात् अपांनपाच्च देव

ताप्रत्ययसंनियोगेन तृचो रूपं निपात्यते अत एव अपोनपातेऽपांनपाते नप्त्रे ब्रूहीति प्रैषः छ च योगविभा

गो यथासंख्यनिवृत्त्यर्थः अपोनप्त्रीयम् अपांनप्त्रीयम् शतरुद्राद्घश्च चात् छः शतं रुद्रो देवतास्य शतरु

द्रियम् शतरुद्रीयम् षष्ठ्यर्थे विधानसामर्थ्याद्द्विगोर्लुगनपत्ये इति न लुक् महेन्द्राद्घाणौ च चात् छः महेन्द्रियं हविः

माहेन्द्रं महेन्द्रीयम् सोमाट्ट्यण् सौम्यम् टित्वान्ङीप् सौमी ऋक् वाय्वृतुपित्रुषसो यत् वायव्यम् ऋतव्यम् १२९

रीकृतः अकृञ्यकारे परे ऽसार्वधातुके यकारे च्वौ च परे ऋदन्तं गस्य रीङादेशः स्यात् यस्येति च यिङ्गेऽउष संय्या

वापृथिवी शुनासीरम् मरुत्वत् अग्नीषोमौ वास्तोष्पति गृहमेधाच्छ च चाद्यत् द्यावापृथिवीयम् द्यावापृथिव्यम्

शुनासीरीयम् शुनासीर्यम् अग्नेर्ढक् आग्नेयः कालेभ्यो भववत् मासिकम् प्रावृषेण्यम् महाराजप्रोष्ठ

पदाट्ठञ् माहाराजिकम् प्रौष्ठपदिकम् देवताद्वन्द्वे च अत्र पूर्वोत्तरपदयोराद्यचोर्वृद्धिः स्यात् ञिति णिति किति

च परे आग्निमारुतम् नेन्द्रस्य परस्य सौमेन्द्रः परस्य किम् ऐन्द्राग्नं दीर्घाच्च वरुणस्य दीर्घात्परस्य वरुणस्य

न वृद्धिः ऐन्द्रावरुणम् दीर्घात्किम् आग्निवारुणीमनड्वाहीम् तदस्मिन्वर्तते इति नवयज्ञादिभ्य उपसंख्याने ॥

नावयज्ञिकः कालः पाकयज्ञिकः पूर्णमासादण्वक्तव्यः पूर्णमासोऽस्यां वर्तते पौर्णमासी तिथिः पितृव्यमा

तुल मातामहपितामहाः एते निपात्यन्ते पितुर्भ्रातरि व्यत् पितुर्भ्राता पितृव्यः मातुर्डुलच् मातुर्भ्राता मातुल

सि॰ कौ॰ १३

लः मातृपितृभ्यां पितरि डामहच् मातुः पिता मातामहः पितुः पिता पितामहः मातरि षिच्च मातामही पितामही
अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः सकारपाठसामर्थ्यान्न षः अविसोढम् अविदूसम् अविमरीसम् तिलान्नि
ष्फलात्पिंजपेजौ तिलपिंजः तिलपेजः वंध्यस्तिल इत्यर्थः पिंजश्छंदसि डिच्च तिल्पिंजः तस्य समूहः काकानां
समूहः काकम् वाकम् भिक्षादिभ्योऽण् भिक्षाणां समूहो भैक्षम् गर्भिणीनां समूहो गार्भिणम् इह भस्याढे इति
पुंवद्भावे कृते इनण्यनपत्ये अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात् तेन नस्तद्धिते इति टिलोपो न युवतीनां स
मूहो यौवनम् प्राच्चैतादेरञि यौवतं गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् एभ्यः
समूहे वुञ् स्यात् लौकिकमिह गोत्रम् तदपत्यमात्रम् युवोरनाकौ युवु एतयोरनुनासिकयोः क्रमादन अ
क एतावादेशौ स्तः ग्लुचुकायनीनां समूहो ग्लौचुकायनकम् औक्षकमित्यादि आपत्यस्य च यलोपे प्राप्ते अ १३

138

कृत्याः केराजन्यमनुष्ययुवानः राजन्यकम् मानुष्यकम् वृद्धाच्चेतिवक्तव्यम् वार्द्धकम् केदाराद्यञ्च
वाद्वुञ् कैदार्यम् केदारकम् गणिकायायञितिवक्तव्यम् गाणिक्यम् ठञ् कवचिनश्च चात्केदा
रादपिकवचिनां समूहः कावचिकं कैदारिकम् ब्राह्मणमाणववाडवाद्यत् ब्राह्मण्यम् माण
व्यम् वाड्व्यम् पृष्ठादुपसंख्यानम् पृष्ठ्यः ग्रामजनबंधुभ्यस्तल् ग्रामताजनता बंधुता गजसहाय
भ्यां चेतिवक्तव्यम् गजतासहायता अह्नःखः क्रतौ अहीनः अहर्गणसाध्यस्य क्रतोरित्यर्थः
क्रतौ किम् आह्नः अहःखंडिकादित्वादञ् अह्नष्टखोरेवेतिनियमाट्टिलोपो न पर्श्वाणस्वक्तव्यः सि
